वेदान्तमहाचार्य पं.वि.मधुपाल गट्टूलालशर्मणः

॥ अथ श्री विष्णुयागस्यपद्धतिः ॥ नवीनपुर ॥

॥१॥ श्रीगणेशायनमः ॥ अथविष्णुयागेप्रथमंगणपतिपूजनपृथ्वीपूजनखनित्रपूजनइष्टका
पूजनस्वस्तिवाचनमातृस्थापनवैश्वदेववृद्धिश्राद्धमंडपपंचगव्यप्रोक्षणंमंडपस्यपश्चिम
द्वारेब्राह्मणानांवरणंवरणानंतरंमधुपर्कंब्राह्मणानामर्चनंपश्चात्पुण्याहंवाचनमंडपद्वा
रेवर्द्धनीकलशप्रवेशदशावतारकलशस्थापनमंडपसकलिकरणयथाशक्तिसूर्यादिग्र
हस्तुद्यादिन्यासकेशवादिन्यासगणपतिक्षेत्रपालवास्तुयोगिनिमहावेद्योपरिसर्व
तोभद्रविष्णुषोडशद्वारामंडलंवारचयित्वातदुपरिविष्णुलक्ष्मीस्थापनंविष्णुयागेविष्णु
यंत्रोद्धारपात्रस्थापनपीठपूजाआवाहनप्रतिष्ठासप्तदशमुद्राषोडशोपचारसावर
णानांपूजापद्धतिर्लिख्यते ॥ प्रणम्यतातंविश्रामंविघ्नेशंजगदंबिकां । शिष्याणामुपकारा राम
यचैतस्यपद्धतिंब्रुवे ॥१॥ मंडपकरणेपूर्वंयथाशास्त्रंप्राचींसाधयेत् ॥ तत्रपूर्वंसमारभ्य ॥१॥

र्मं कृत्वा । तत्र आदौ गणपतिपूजनं यजमान प्राङ्मुखउपविश्य ॥ स्वदक्षिणे पूजासाम
ग्रीसंन्यस्य । आचम्य प्राणानायम्य । देशकालौ संकीर्त्य करिष्यमाणमंडपस्संभूम्योपरि
वेष्टवयशास्त्रकर्मणोंगतयाविहितनिर्विघ्नतासिद्ध्ये गणपतिपूजनमहं करिष्ये ॥ सु
पीठे रक्तवस्त्रमास्तीर्य तदुपरि तंडुलेन अष्टदलं कृत्वा कर्णिकायां प्रतिमामक्षतपुंजं वानि
धाय । तत्र गणपतिमावाहयेत् । आतून इंद्र इति मंत्रेण गणपतिगायत्रिमंत्रेण आवाहयेत्
गणपते इहागच्छ इह तिष्ठेति संस्थाप्य प्रतिष्ठां कृत्वा पूजां कुर्यात् ॥ ॐ तत्पुरुषाय विद्महे वक्रतुं त
डाय धीमहि तन्नो दंती प्रचोदयात् । इति गणपतिगायत्रीमुच्चार्य गणपतये आसनं सम
र्पयामि । एवं पाद्यं । अर्घ्यं । आचमनीयं । स्नानं । पुनराचमनीयं । वस्त्रं । पुनराचमनीयं
उपवीतं । पुनराचमनीयं । गंधं । पुष्पं । धूपं । दीपं । नैवेद्यं । पुनराचमनीयं प्रदक्षिणा

॥२॥ ॥स्तुतिः॥ नमस्कारः॥ नालिकेरादिनार्घ्यं॥ ततः पुष्पांजलिः॥ उपचारानिमांस्तुभ्यं ददामि परमेश्व
र॥ भक्त्या गृहाण देवेश त्वामहं शरणं गतः॥ इति पुष्पांजलिदानेन उपचारान् समर्प्य॥ बद्धांजलिः
॥वक्रतुंड महाकाय सूर्यकोटिसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥२॥ इति संप्रार्थ्य
॥देवपूजितोसि क्षमस्व॥ इति विसर्जयेत्॥ इति गणपतिपूजाप्रयोगः॥ अथ पृथिव्यादीनां
पूजनं॥ आचमनं॥ प्राणायामः॥ देशकालौ संकीर्त्य करिष्यमाण वेश्मवयज्ञाख्यकर्मणां
गतया विहितं मंडपांगं निर्विघ्नतासिद्ध्यर्थं भूमिकूर्मानंतादीनां पूजामहं करिष्ये॥ इति सं
कल्प्य॥ कूर्मपृष्ठोपरिस्थितां शुक्लवर्णां चतुर्भुजां पद्मशंखशूलधरां सुप्रसन्नां पृथिवीं॥
ध्यात्वा पुष्पांजलिरावाहयेत्॥ आगच्छ सर्वकल्याणि वसुधे लोकधारिणि॥ पृथिवी ब्रह्म राम
दत्तासि काश्यपेनाभिवंदिता॥ रत्नाकरे विष्णुना संधृता वाराहरूपिणी॥ आगच्छ वरदे॥२॥

धात्री यज्ञेस्मिन् शुभदायिनी ॥ इति भूमिमावाह्य भूम्यै नमः ॥ इति पुष्पांजलिं क्षिपेत् ॥ त
तो भूम्यै आसनं समर्पयामि ॥ भूम्यै पाद्यं ॥ भूम्यै अर्घ्यं ॥ भूम्यै आच० ॥ स्नानं ॥ भूम्यै पु० ॥ भू
म्यै चं० ॥ भूम्यै पुष्पं ॥ भूम्यै धूपं ॥ भूम्यै दीपं ॥ भूम्यै नैवेद्यं ॥ पुनराचमनं ॥ प्रदक्षिणा ॥ एवं संपू
ज्य ॥ संस्तुत्य ॥ नमस्कुर्यात् ॥ शेषमूर्द्धस्थितां रम्यां नानासुखप्रदायिनीं ॥ विश्वधात्रीम
हं पुण्यां विश्वस्य जननीं परां ॥ यज्ञभागं प्रतीछस्व खातार्थं प्रणमाम्यहं ॥ तवोपरि करिष्या
मि मंडपं शुभलक्षणं ॥ क्षंतव्यं च त्वया देवी सानुकूला मखे भव ॥ भूमे त्वं रत्नगर्भासि सप्त
सागरसंयुता ॥ बीजानि विविधानीह प्ररोहंति सदा त्वयि ॥ नानाकर्मसु कुशले स्वस्थि
राशेषसंस्थिता ॥ धरणी काश्यपी क्षोणी रसा विश्वंभरा च भूः ॥ जगत्प्रतिष्ठा वसुधे त्वं हि
मातर्नमोस्तु ते ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ दंष्ट्राग्रे लीलया देवी यज्ञा

॥३॥ र्ध्वञ्चणमाम्यहं॥ मातर्भूमिरगान्माता सर्वधारा हरिप्रिया॥ भूयामपुत्रैः पशुभिर्योनोद्वे
ष्टिस्तभिघ्नतां॥ निर्विघ्नं मम कर्मेदं यथा स्यात्त्वं तथा कुरु॥ एवं संप्रार्थ्य॥ दर्भैः खातस्थानानि
मार्जयेत्॥ स्योना पृथिवीति मेधातिथिः परउष्णिक् पृथिवी मार्जने विनियोगः॥ स्योनापृ
थि०॥ अनेन सर्वाणि खातस्थानानि संमार्ज्य॥ सिंचंति त्यस्य इर्यतः प्रगाथो गायत्री द्र०॥ से
चने विनियोगः॥ सिंचंति नमसावटमुच्चाचक्रं परिमानं॥ नीचीनबारमक्षितं॥ अनेन स
र्वत्र पंचामृतैः पंचगव्यैः सिंचेत्॥ सर्वत्र गंधाद्यैः संपूज्य॥ अर्घपात्रे जलपुष्पाक्षतानि कृत्वा
हस्ताभ्यां पात्रमादाय॥ अर्घं दद्यात्॥ तत्र मंत्रः॥ वसुधे पूजितासि त्वं विष्णुनार्ककरेण च
॥ पार्वत्या चैव गायत्र्या स्कंद वैश्रवणादिभिः॥ इंद्राद्यैः पूजितासि त्वमधर्मविजिगीषया राम
॥ सौभाग्यं देहि पुत्रांश्च धनं धान्यं शुभं मतिं॥ गृहाणार्घमिमं देवि कर्मसिद्धिं प्रयच्छ मे ॥३॥

इत्यर्घं दत्वा पुष्पांजलिमादाय । उपचारामिमांस्तुभ्यं ददामि परमेश्वरि ॥ भक्त्या गृहाण देवेशि
त्वामहं शरणं गतः ॥ ततः पायसापूपशर्करादि द्रव्यं पात्रे कृत्वा संस्थाप्य ॥ सपरिवारायै भूम्यै इ
मं बलिं समर्पयामि ॥ नमम ॥ इति बलिं दद्यात् ॥ ततः खनित्र पूजा ॥ त्वष्ट्रा विनिर्मितः सर्वलोकानां
हितकाम्यया ॥ पूजितोसि खनित्र त्वं सिद्धिदो भव मेधुना ॥ ततः सूत्रधारं पूजयेत् ॥ आवाहयाम्यहं
देवं शंखचक्र प्रजापति ॥ अनेककल्पकर्त्तारं सर्वेषां हितकारकं ॥ विश्वरूपं निराधारं निरालं
बं निरामयं ॥ आगच्छ देवदेवेशं मद्भूमिमंडपं कुरु ॥ नमामि विश्वकर्माणं सर्वकर्मप्रवर्त्तकं ॥
मंडपादि प्रसिध्यर्थं सर्वकार्यसमृद्धिदं ॥ विश्वकर्मन्नहविवेति पूजयेत् ॥ ततः अंगुल निर्माणं
पूजयेत् ॥ अंगुलादि प्रमाणार्थं निर्मितो विश्वकर्मणा ॥ अतस्त्वां पूजयामीह मंडपेष्टप्रसाध
य ॥ ततः खननोगमाधारशक्त्यादीनां पूजनं ॥ आधारशक्त्यै नमः ॥ कूर्माय नमः ॥ अनं

॥ ४ ॥ तायनमः ॥ पृथिव्यै नमः ॥ वास्तुपुरुषाय नमः ॥ स्वस्वदिक्षु इंद्रादीन् पूर्वादि ॥ इंद्राय नमः ॥
अग्नये ॥ यमाय ॥ नैर्ऋतये नमः ॥ वरुणाय नमः ॥ वायवे नमः ॥ कुबेराय नमः ॥ ईशानाय न
मः ॥ ब्रह्मणे नमः ॥ अनंताय नमः ॥ ततो बलिमुपनीय वास्तुपुरुषायेमं बलिं समर्पयामि
॥ द्वितीयं बलिमुपनीय ॥ इंद्रादिदिक्पतिभ्य इमं बलिं समर्पयामि ॥ ततः पृथिव्यै पुष्पांज
लिमादाय ॥ त्वं देवि खननार्थं तु पूजां गृहाण मे मखे ॥ पूजनाच्छेषकुर्माभ्यां शुभां वृद्धिं प्र
यच्छ मे ॥ पृथिव्योपरि पुष्पांजलिं दत्वा ॥ इति खनित्रपूजा ॥ अथ इष्टिकापूजनं ॥ आचमनं
प्राणायामः ॥ देशकालौ स्मृत्वा ॥ वेश्मवयज्ञाख्यकर्मणोंगतया विहितइष्टिकाभिर्वेदि
करणार्थं इष्टकानां प्रार्थनापूर्वकं पूजामहं करिष्ये ॥ इति संकल्प्य ॥ हस्ते पुष्पांजलिमा राम
दाय प्रार्थयेत् ॥ त्वं हि नीदेवि वासिष्ठैर्वसुभिः पूजितासती ॥ जयेभार्गवदायादे प्रजानां ॥ ४ ॥

जपमावह॥ पूर्णगिरीन्द्रादायदि पूर्णकामं कुरु धर्मे॥ भद्रे काश्यपदायादे कुरुभद्रांमतिंमम
॥प्रजापतिसुतेदेवि चतुरस्रेमहीसुते॥ इष्टदेतं प्रयछेष्टं त्वांप्रतिष्ठापयाम्यहं॥ देशग्रामपु
रक्षेत्रगृहस्थापिशुसौख्यदा॥ मनुष्यपशुहस्त्यश्वधनवृद्धिकरीभव॥ इतिसंप्रार्थ्य चंद
नपुष्पादिभिः संपूज्य॥ नैवेद्यादिबलिदानांतंकुर्यात्॥ अद्यपूर्वोच्चरितएवंपुण्यतिथौ इ
ष्टकानां पूजनविधेः सर्वंपरिपूर्णतामस्तु॥ इतिइष्टिकापूजनं॥ अथपुण्याहवाचनंकारये
त्॥ पश्चान्मातृस्थापनं॥ वैश्वदेवं॥ वृद्धिश्राद्धंकारयेत्॥ अथद्वितीयदिनकृत्यं॥ यजमा
नः प्रातः स्नानादिनित्यंसमाप्य॥ सांगमंडपंकारयेत्॥ मंडपमध्येमानपूर्वकसत्वपीग
निकृत्वा॥ वेदीपार्श्वांतरंत्यक्त्वा॥ कुंडंकार्यंचपश्चिमे॥ एकहस्तं॥ द्विहस्तंवा॥ त्रिहस्तंचतुर्ह
स्तकं॥ वेदीवसिद्धांते॥ होमानुसारतः कुंडेकर्तव्यंशास्त्रसंमितं॥ चतुरस्रंप्रकर्तव्यंयो

॥५॥ न्विकीपत्रशोभितं ॥२॥ मेखलात्रयसंयुक्तं कंठं कृत्वा विनततः ॥ नाभिमात्रसमोपेतमुखां गंयाग
साधकं ॥३॥ सदासंमार्जयेत्कुंडं कुंडमंडपवेदिकां ॥ पुनश्च गोमयेनैव मृत्तिकाभिश्च लेपये
त् ॥४॥ मंडपांतरे विधिवत् पंचगव्येन प्रोक्षयेत् ॥ मंडपस्य पश्चिमद्वारस्थ चौदेशे गोमयो
पलिप्ते चतुष्कोणे मंडले स्वस्तिकोपेते चंदनादिभिरर्चिते स्वरूपे श्रीपर्णीश्चासने उदङ्मुखेन
सपत्नीकेन यजमानेनोपवेशनं ॥ सर्वे वरुणोपहारा लांगृहीत्वा ॥ इति वरुणः ॥ पश्चान्मधुपर्क
स्वस्तिवाचनं कृत्वा प्रार्थना ॥ यजमानसपत्नीको दद्यात्ते पांच दक्षिणा ॥ विघ्नयागस्यानिष्प
त्त्यै भवंतोभ्यार्थितामया । सुप्रसादं प्रकर्तव्यमेतत्कर्म यथाविधि ॥ मंडपांतरे राक्षोघ्न
मंत्रेण भूतोत्सादनं कुर्यात् ॥ अपसर्पंतु ये भूता । ॥३॥ नाराचमुद्रया मंडपांतरे सर्षपान् राम
विकिरेत् ॥ इति भूतोत्सादनं ॥ अथानंतरं वर्द्धनीपूर्णार्थं तीर्थांतरात् जलस्याहरणं ॥ त ॥५॥

तोस्सपुत्रिकोयजमानवर्द्धनीकलशंगृहीत्वा आचार्यसऋत्विग्भिः गीतवादित्रैः शांतिसू
क्तेनमंडपंप्रदक्षिणीकृत्य ॥ मंडपस्यपश्चिमद्वारे प्रविशेत् ॥ वेद्याः पश्चिमदिग्भागे अ
ष्टदलंकृत्वा ॥ तदुपरिवर्द्धनीकलशंविधिवत्स्थापयेत् ॥ वर्द्धनींप्रार्थयेत् ॥ इति वर्द्धनी
कलशं ॥ मण्डवेद्याः पश्चिमेस्वपीठः ॥ भूतशुद्ध्यादिन्यासान्कुर्यात् ॥ आचमनं ॥ कामरा
जपुटितमातृकयाप्राणायामः ॥ स्वरैः अकारादि १६ षोडशस्वरैः पूरकं ॥ ॐ क्लीं अं क्लीं आं
क्लीं० एवंपूरकं ॥ स्पर्शैः कुंभकं ॥ कादयोमावसानाः स्पर्शाः ॥ ॐ क्लीं कं क्लीं खं क्लीं ॥ इत्यादिम
पर्यंतंकुंभकं ॥ यादिभिरेचकं ॥ एवंप्राणायामंविधाय ॥ अत्राद्येतिपठित्वा ॥ ममधर्मा
र्थकाममोक्षार्थंविष्णुपूजनाधिकारार्थंकेशवादिमातृकान्यासमहंकरिष्ये ॥ ॐ अस्य
श्रीकेशवादिमातृकान्यासस्यप्रसाध्यनारायणऋषिः ॥ अमृतागायत्रीछंदः ॥ श्रील

॥ ७ ॥ श्रीनृसिंहोदेवता ह्लौं बीजानि ॥ स्वराश्चाक्षयः ॥ बिंदवः कीलकं ॥ ममसर्वाभीष्टसिध्यर्थेन्यासेवि
नियोगः ॥ रुष्यादिन्यासान्पूर्वोक्तिस्थलेषुन्यसेत् ॥ शक्तिश्रीकामपुटितमातृकयाकरशुद्धिः ॥
एकदांगुष्टमारभ्य उभयोरपिहस्तयोः ॥ कनिष्टांतंभवेत्न्यासःस्थितिनाममहोदयः ॥ तद्यथा
॥ अथकरशुद्धिस्थितिमातृकामाह ॥ ॐ ह्रीं श्रीं क्लीं डंनमः ॥ ॐ ह्रीं श्रीं क्लीं ढंनमः ॥ ॐ ह्रीं श्रीं क्लीं णंनमः
॥ इतिदक्षकरकनिष्ठापर्वत्रयेषु ॥ एवंबीजानिसर्वत्र ॐ ह्रीं श्रीं क्लीं तंनमः ॥ ॐ २ थंनमः ॥ ॐ २ दंन
मः ॥ इतिवामकरकनिष्ठापर्वत्रयेषु ॥ ॐ धंनमः ॥ ॐ २ नंनमः ॥ ॐ २ पंनमः ॥ इतिवामकरअनामि
कापर्वत्रयेषु ॥ ॐ २ फंनमः ॥ ॐ २ बंनमः ॥ ॐ २ भंनमः ॥ इतिवामकरमध्यमांगुलिपर्वत्रयेषु
ॐ २ मंनमः ॥ ॐ २ यंनमः ॥ ॐ २ रंनमः ॥ ॐ इतिवामकरतर्जन्यांगुलिपर्वत्रयेषु ॥ ॐ २ लंनमः राम
ॐ २ वंनमः ॥ ॐ २ शंनमः ॥ इतिवामकरांगुष्ठपर्वत्रयेषु ॥ ॐ २ षंनमः ॥ दक्षकरांगुल्यग्रेव्याप ॥ ६ ॥

कं ॐ सं नमः । इति वामकरांगुल्यग्रे व्यापकं ॥ ॐ हं नमः ॥ इति करतलयोः ॥ ॐ लं नमः क
रपृष्ठयोः ॐ क्षं नमः इति कराग्रयोः ॥ ॐ अं नमः इति दक्षकरतले ॥ ॐ आं नमो वामकरत
ले ॥ ॐ इं नमो दक्षकरपृष्ठे ॥ ॐ ईं नमो वामकरपृष्ठे ॥ ॐ उं नमो दक्षकरांगुल्यग्रे ॥ ॐ ऊं न
मो वामकरांगुल्यग्रे ॥ ॐ ऋं नमो दक्षकरकनिष्ठिकायां ॥ ॐ ॠं नमो दक्षकरअनामिकायां
॥ ॐ लृं नमो दक्षकरमध्यमायां ॥ ॐ ॡं नमो दक्षकरतर्जन्यां ॥ ॐ एं नमो दक्षकरांगुष्ठे ॥
ॐ ऐं नमो वामकरकनिष्ठिकायां ॥ ॐ ओं नमो वामअनामिकायां ॥ ॐ औं वामकरमध्यमायां ॥
॥ ॐ अं नमः इति वामतर्जन्यां ॥ ॐ अः नमः ॥ इति वामकरांगुष्ठे ॥ ॐ ह्रीं श्रीं क्लीं ऊं नमो दक्षकर
कनिष्ठिकामारभ्य वामकरांगुष्ठांतं न्यसेत् ॥ ॐ कं नमः ॥ ॐ खं नमः ॥ ॐ गं नमः ॥ इति दक्ष
करांगुष्ठपर्वत्रयेषु ॥ ॐ घं नमः ॥ ॐ ङं नमः ॥ ॐ चं नमः ॥ इति दक्षकरतर्जनीपर्वत्रयेषु

॥७॥ ॐ ऋं छं नमः ॥ ॐ ऋं जं नमः ॥ ॐ ऋं झं नमः ॥ इति दक्षकरतलमध्यमांगुलिपर्वत्रयेषु ॥ ॐ ह्रीं श्रीं क्लीं ञं
नमः ॥ ॐ ऋं टं नमः ॥ ॐ ऋं ठं नमः ॥ इति दक्षकरानामिकापर्वत्रयेषु ॥ इति करशुद्धिः स्थितिमातृका
याकरशुद्धिः ॥ अथ करांगन्यासः ॐ ह्रीं श्रीं क्लीं अं कं खं गं घं ङं आं क्लीं श्रीं ह्रीं ॐ अंगुष्ठाभ्यां नमः
॥ ॐ ह्रीं श्रीं क्लीं इं चं छं जं झं ञं ईं क्लीं श्रीं ह्रीं ॐ तर्जनीभ्यां नमः ॥ ॐ ह्रीं श्रीं क्लीं उं टं ठं डं ढं णं ऊं क्लीं श्रीं
ह्रीं मध्यमाभ्यां नमः ॥ ॐ ह्रीं श्रीं क्लीं एं तं थं दं धं नं ऐं क्लीं श्रीं ह्रीं ॐ अनामिकाभ्यां नमः ॥ ॐ ह्रीं श्रीं
क्लीं ओं पं फं बं भं मं औं क्लीं श्रीं ह्रीं ॐ कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रीं श्रीं क्लीं अं यं रं लं वं शं षं सं हं ळं क्षं
अः क्लीं श्रीं ह्रीं ॐ करतलपृष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ ततो दिग्बंधः ॥ ॐ प्राच्यां
दिशि रक्षतु सुदर्शनेन चक्रेण एव ध्यामि नमश्चक्राय स्वाहा ॥ एवं आग्नेयादि दशदिशो बध्वा भो राम
भो सुदर्शनचक्र त्रैलोक्यं रक्ष रक्ष हुं फट् स्वाहा ॥ इंद्रादीन् नमस्कृत्य ॐ रं रं रं तेजोज्वल ॥७॥

मकाराय नमः ॥ अग्निमाकारत्रयं ॥ त्रिपुटी नारायणाक्षर पुटितमात्रकया व्यापकं ॥ ॐ ह्रीं श्रीं क्लीं
ॐ नमो नारायणाय श्रें श्रां ५१ ह्रीं श्रीं क्लीं ॐ इति सर्वांगि व्यापकं ॥ ततः पीठन्यासः ॥ ॐ मं मंडूकाय
नमो मूलाधारे ॥ ॐ कां कालाग्निरुद्राय नमः स्वाधिष्ठाने ॥ ॐ कं कूर्माय नमो नाभौ ॥ ॐ आं आधार
शक्तये नमो हृदि ॥ ॐ अं अनंताय नमः ॥ ॐ पं पृथिव्यै नमः ॥ ॐ क्षीं क्षीरसमुद्राय नमः ॥ ॐ श्वें
श्वेतद्वीपाय नमः ॥ ॐ कं कल्पवृक्षेभ्यो नमः ॥ ॐ मं मणिहर्म्याय नमः ॥ इति स्वहृदि पर्युपरिन्य
सेत् ॥ ॐ धं धर्माय नमो दक्षांसे ॥ ॐ ज्ञां ज्ञानाय नमो वामांसे ॥ ॐ वै वैराग्याय नमो वामोरो ॥ ॐ
ऐं ऐश्वर्याय नमो दक्षोरो ॥ ॐ अं अधर्माय नमो मुखे ॥ ॐ अं अज्ञानाय नमो वामपार्श्वे ॥ ॐ अनै
श्वर्याय नमो दक्षपार्श्वे ॥ ॐ अं अवैराग्याय नमो नाभौ ॥ ॐ अनंताय नमो हृदये ॥ ॐ तत्वम
यपद्माय नमः ॥ ॐ आनंदकंदाय नमः ॥ ॐ सं विद्नालाय नमः ॥ ॐ प्रं विकारमयकेसरेभ्यो

॥८॥ नमः ॥ ॐ प्रकृतिमयपत्रेभ्यो नमः ॥ ॐ पंचाशद्वर्णबीजाढ्यकर्णिकायै नमः ॥ ॐ अं सूर्यमंडलाय
द्वादशकलात्मने नमः ॥ ॐ उं सोममंडलाय षोडशकलात्मने नमः ॥ ॐ मं वह्निमंडलाय दश
कलात्मने नमः ॥ ॐ सं सत्वाय नमः ॥ ॐ रं रजसे नमः ॥ तं तमसे नमः ॥ ॐ आं आत्मने नमः ॥ ॐ
अं अंतरात्मने नमः ॥ ॐ पं परमात्मने नमः ॥ ॐ ह्रीं ज्ञानात्मने ॥ ॐ मं मायातत्वाय नमः ॥ कं
कलातत्वाय नमः ॥ ॐ विं विद्यातत्वाय नमः ॥ ॐ पं परतत्वाय नमः ॥ ततो विमलादिपीठश
क्तीः स्वहृदये न्यसेत् ॥ हृदयाष्टदलपद्मेषु ॥ ॐ विमलायै नमः ॥ ॐ उत्कर्षिण्यै नमः ॥ ॐ ज्ञाना
यै नमः ॥ ॐ क्रियायै नमः ॥ ४ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्व्यै नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ई
शानायै नमः ॥ ८ ॥ मध्ये ॥ ॐ अनुग्रहायै नमः ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदे राम
वाय सर्वभूतात्मसंयोगयोगपद्मपीठात्मने नमः ॥ इति हृदयमध्ये ॥ ततो ध्यानं ॥ ॥ ॥८॥

॥ हस्तैर्बिभ्रत् सरसिजगदाशंखचक्राणि विद्योपमादर्शौ कनककलशं मेघविद्युद्विला
सं ॥ वामोत्तुंगस्तनमविरलाकल्पमाश्लेषशोभादेकीभूतं वपुरवतु नः पुंडरीकाक्ष
लक्ष्म्योः ॥२॥ ध्यानांतरं च ॥ शंखचक्रगदापद्मकुंभादर्शंविधुस्तकं ॥ बिभ्रतं मेघचप
लावर्णं लक्ष्मीहरिं भजे ॥२॥ एवं ध्यात्वा ॥ मूलेन मूर्त्तिं प्रकल्प्य ॥ स्वहृदये सद्यावरण
संयुतां ॥ केशवादिमात्रकां पूजयेत् ॥ मानसोपचारैः ॥ तद्यथा ॥ आग्नेयादिषु कोण
षु हृदयं च शिरः शिखां वर्माभ्यर्च्याग्रतो नेत्रं दिक्षु स्त्रं परिपूजयेत् ॥ हृदयशक्तये न
मः ॥ शिरःशक्तये नमः ॥ शिखाशक्तये नमः ॥ कवचशक्तये नमः ॥ नेत्रशक्तये नमः ॥
अस्त्रशक्तये नमः ॥ इति प्रथमावरणं ॥ पूर्वादिषु दलेषु ॥ अं आं नमः ॥ इं ईं नमः ॥ उं
ऊं नमः ॥ ऋं ॠं नमः ॥ लृं ॡं नमः ॥ एं ऐं नमः ॥ ओं औं नमः ॥ अं अः नमः ॥ इति द्वितीयमाव

९ ॥ रणं २ कंखंगंघंङंनमः ॥ १ चंछंजंझंञंनमः ॥ २ ॥ टंठंडंढंणंनमः ॥ ३ ॥ तंथंदंधंनंनमः ॥ ४ ॥ पंफंबं
भंमंनमः ॥ ५ ॥ यंरंलंवंनमः ॥ ६ ॥ शंषंसंहंनमः ॥ ळंक्षंनमः ॥ इतितृतीयावरणं ॥ ततः पूर्वाद्यष्ट
दलेषु ॥ ॐ व्यापिन्यैनमः ॥ ॐ पालिन्यैनमः ॥ ॐ पाविन्यैनमः ॥ ॐ क्लेदिन्यैनमः ॥ ॐ धारिण्यैनमः ॥ मा
लिन्यैनमः ॐ हंसिन्यैनमः ॥ ॐ शाखिन्यैनमः ॥ इतिचतुर्थावरणं ॥ ततः पूर्वाद्यष्टदलेषु ॥ ॐ आं ब्राह्म्यै
नमः ॥ ॐ ईं माहेश्वर्यैनमः ॥ ॐ ऊं कुमार्यैनमः ॥ ॐ ॠं वैष्णव्यैनमः ॥ ॐ ऌं वाराह्यैनमः ॥ ॐ ऐं इंद्राण्यै
नमः ॐ औं चामुंडायैनमः ॥ ॐ अः महालक्ष्म्यैनमः ॥ इतिपंचमावरणं ॥ ॐ लं इंद्रायनमः ॥ ॐ रं अ
ग्नयेनमः ॥ ॐ मं यमायनमः ॥ ॐ क्षं निर्ऋतयेनमः ॥ ॐ वं वरुणायनमः ॥ ॐ यं वायवायनमः ॥ ॐ सं
सोमायनमः ॥ ॐ हं ईशानायनमः ॥ ॐ आं ब्रह्मणेनमः ॥ ॐ ह्रीं अनंतायनमः ॥ इतिभूतत्रयेषुष राम
ष्ठावरणं ॥ ॐ वं वज्रायनमः ॥ ॐ शं शक्त्यैनमः ॥ ॐ दं दंडायनमः ॥ ॐ खं खड्गायनमः ॥ ॐ पां पाशा ॥ ९ ॥

यनमः ॥ ॐ अंअंकुशायनमः ॥ ॐ गंगदायै नमः ॥ ॐ त्रिंत्रिशूलायेनमः ॥ ॐ पंपद्मायनमः ॥ ॐ कैव
कायनमः ॥ एवं सप्तावरणसंयुक्तो केशवादिमातृकासरस्वतीं गंधादिभिः पूजयेत् ॥ ॐ लं पृथि
व्यात्मकं गंधं समर्पयामि ॥ ॐ हं आकाशात्मकं पुष्पं समर्पयामि ॥ यं वायव्यात्मकं धूपं समर्पया
मि ॥ ॐ रं ज्ञानात्मकं दीपं समर्पयामि ॥ ॐ वं अमृतात्मकं अमृतनैवेद्यं समर्पयामि ॥ ॐ सौः श
त्यात्मकं तांबूलं समर्पयामि ॥ इति संपूज्य शंख। चक्र। गदा। पद्म। कुंभ। आदर्श। ध्वज। पुस्तक।
किरीट। कुंडल। कलश। श्रीवत्स। कौस्तुभ। वनमाला। जगन्मोहिनिका। काम। गरुड। लक्ष्मी। यो
निमुद्रां प्रदर्शय ॥ स्वशरीरे केशवादिमातृकान्यसेत् ॥ तद्यथा ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणा
य अं क्लीं श्रीं ह्रीं केशवकीर्तिभ्यां नमः केशांते ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ॥ आं क्लीं श्रीं ह्रीं ना
रायणाय कांतिभ्यां नमो मुखवृत्ते ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो २ नारायणाय ॥ इं क्लीं श्रीं माधव तुष्टिभ्यां

॥१०॥ नमो दक्षनेत्रे ॥ ॐ ह्रीं श्रीं क्लीं नमो नारायणाय ॥ ईं क्लीं श्रीं ह्रीं गोविंद पुष्टिभ्यां नमो वामनेत्रे ॥ ॐ ह्रीं
श्रीं क्लीं नमो नारायणाय ॥ उं क्लीं श्रीं ह्रीं विष्णु धृतिभ्यां नमो दक्षकर्णे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारा
यणाय ॥ ऊं क्लीं श्रीं ह्रीं मधुसूदनशक्तिभ्यां नमो वामकर्णे ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ॥ ऋं
क्लीं श्रीं ह्रीं त्रिविधक्रमक्रियाभ्यां नमो दक्षिणनसि ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ॥ ॠं क्लीं श्रीं ह्रीं वा
मनदयाभ्यां नमो वामनसि ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारा० ऌं क्लीं श्रीं ह्रीं श्रीधरमेधाभ्यां नमो दक्षक
पोले ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ॡं क्लीं श्रीं ह्रीं हृषीकेशहर्षाभ्यां नमो वामकपोले ॥ ॐ ह्रीं श्रीं क्लीं
ॐ नमो नारायणाय ॥ एं क्लीं श्रीं ह्रीं पद्मनाभश्रद्धाभ्यां नमः ऊर्ध्वदंतपंक्तौ ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो ना
रायणाय ॥ ऐं क्लीं श्रीं ह्रीं दामोदरलज्जाभ्यां नमः अधःदंतपंक्तौ ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणा राम
य ॥ ओं क्लीं श्रीं ह्रीं वासुदेवलक्ष्मीभ्यां नमः ऊर्ध्वोष्ठे ॥ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ॥ औं क्लीं श्रीं ह्रीं ॥१०॥

संकर्षणसरस्वतीभ्यां नमः अधरोष्ठे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ॥ अं क्लीं श्रीं ह्रीं प्रद्युम्नप्री
तिभ्यां नमो जिह्वायां ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय अः क्लीं श्रीं ह्रीं अनिरुद्धसरस्वतीभ्यां नमो
ग्रीवायां ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय कं क्लीं श्रीं ह्रीं चक्रीजयाभ्यां नमो दक्षबाहुमूले ॥ ॐ ह्रीं
श्रीं क्लीं ॐ नमो नारायणाय खं क्लीं श्रीं ह्रीं गदीदुर्गाभ्यां नमो दक्षकुर्परे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारा
यणाय गं क्लीं श्रीं ह्रीं शार्ङ्गीप्रजाभ्यां नमो दक्षमणिबंधे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय घं क्लीं
श्रीं ह्रीं खड्गीशक्तिभ्यां नमो दक्षांगुलिमूले ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ङं क्लीं श्रीं ह्रीं शं
खिनीचंडाभ्यां नमो दक्षकरांगुल्यग्रे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय चं क्लीं श्रीं ह्रीं हलीवा
लिभ्यां नमो वामबाहुमूले ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय छं क्लीं श्रीं ह्रीं मुसलीविला
सिनीभ्यां नमो वामकुर्परे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय जं क्लीं श्रीं ह्रीं शूलीविजयाभ्यां

॥११॥ नमो वाममणिबंधे ॥ ॐ ह्रीं श्रीं क्लीं नमो नारायणाय ञं क्लीं श्रीं ह्रीं पात्री विरजाभ्यां नमो वामांगुलीमू
ले ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ॥ ञं क्लीं श्रीं ह्रीं अंकुशी विश्वाभ्यां नमो वामकरांगुल्यग्रे ॥ ॐ ह्रीं श्रीं
क्लीं ॐ नमो नारायणाय टं क्लीं श्रीं ह्रीं मुकुंदविमदाभ्यां नमो दक्षपादमूले ॥ ॐ ह्रीं श्रीं क्लीं नमो नारायणा
य ठं क्लीं श्रीं ह्रीं नंदसुनंदाभ्यां नमो दक्षपादजानौ ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय डं क्लीं श्रीं ह्रीं नं
दकीस्मृतीभ्यां नमो दक्षपादगुल्फे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ढं क्लीं श्रीं ह्रीं नरऋद्धिभ्यां न
मो दक्षपादांगुलिमूले ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय णं क्लीं श्रीं ह्रीं नरकजित्समृद्धिभ्यां नमो
दक्षपादांगुल्यग्रे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय तं क्लीं श्रीं ह्रीं हरिशुद्धिभ्यां नमो वामपादमूले
ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय थं क्लीं श्रीं ह्रीं कृष्णबुद्धिभ्यां नमो वामपादजानौ ॥ ॐ ह्रीं श्रीं क्लीं राम
ॐ नमो नारायणाय दं क्लीं श्रीं ह्रीं सत्यमुक्तिभ्यां नमो वामपादगुल्फे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारा ॥११॥

रायणाय धं क्लीं श्रीं ह्रीं सात्वतमतिभ्यां नमो वामपादांगुलिमूले । ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणा-
य नं क्लीं श्रीं ह्रीं शौरिक्षमाभ्यां नमो वामपादांगुल्यग्रे । ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय पं क्लीं श्रीं ह्रीं
श्रीधररमाभ्यां नमो दक्षपार्श्वे । ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय फं क्लीं श्रीं ह्रीं जनार्दनउमाभ्यां नमो
वामपार्श्वे । ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय बं क्लीं श्रीं ह्रीं भूधरकेदिनीभ्यां नमः पृष्ठे । ॐ ह्रीं श्रीं क्लीं
नमो नारायणाय भं क्लीं श्रीं ह्रीं विश्वमूर्त्तिक्लिन्नाभ्यां नमो नाभौ । ॐ ह्रीं श्रीं क्लीं नमो नारायणाय
मं क्लीं श्रीं ह्रीं वैकुंठवसुधाभ्यां नमो उदरे । ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय यं क्लीं श्रीं ह्रीं त्वगात्म
भ्यां पुरुषोत्तमवसुदाभ्यां नमो हृदये । ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय रं क्लीं श्रीं ह्रीं असृग्गा
त्मभ्यां बलीपराभ्यां नमो दक्षांसे । ॐ ह्रीं श्रीं क्लीं नमो नारायणाय लं क्लीं श्रीं ह्रीं मांसात्मभ्यां बला
नुजपरायणाभ्यां नमः ककुदि । ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय वं क्लीं श्रीं ह्रीं मेदात्मभ्यां वली

१२ स्कंधाभ्यां नमो वामांसे ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ऋं क्रं स्वात्मभ्यां वृषभ स्कंधाभ्यां नमो ॥
हृदयादि दक्षहस्ताग्रांतं ॥ ॐ ह्रीं श्रीं क्लीं नमो नारायणाय षं क्लीं श्रीं ह्रीं मज्जात्मभ्यां वृषभ प्रज्ञाभ्यां ॥
नमो हृदयादि वामहस्ताग्रांतं ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय सं क्लीं श्रीं ह्रीं शुक्रात्मभ्यां हंसत्रभा
भ्यां नमो हृदयादि दक्षपादाग्रांतं ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय हं क्लीं श्रीं ह्रीं प्राणात्मभ्यां वरा
हनित्राभ्यां नमो हृदयादि वामपादाग्रांतं ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय ळं क्लीं श्रीं ह्रीं रागरूपात्मभ्यां
विमलामोघाभ्यां नमो हृदयादि नाभ्यंतं ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय क्षः क्लीं श्रीं ह्रीं क्रोधात्मभ्यां
नृसिंहजलक्ष्मीभ्यां नमो हृदयादि मुखांतं ॥ ॐ ह्रीं श्रीं क्लीं ॐ नमो नारायणाय अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं
एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं क्लीं राम
श्रीं ह्रीं इति सर्वांगे व्यापकं इति केशवादि मातृका न्यासः ॥ ॥ तदनंतरं मंत्रउपसकलीकरणं कार्यं ॥ १२ ॥

विधिवत्पूजयेत् इतिमंडपसंस्कारकरणं॥ मंडपे तत्र पीठानि कार्याणि तु यथाक्रमं ईशान्यां रुद्रपीठं॥
तु द्विहस्तपरिसंमितं॥१॥ तदुक्तं वैष्णवे तंत्रे॥ चतुस्त्रिंशांगुलं प्रोक्तमुच्छ्राये द्वादशांगुलं॥ पूर्वे तु क्षेत्रपा
लस्य पीठं कुर्याच्च वैष्णवे॥२॥ द्वादशांगुलं भवेदुच्चं द्विहस्तेन च विस्तृतं॥ दक्षिणे गणपतिपीठं हस्त
मात्रं तु कारयेत्॥३॥ नैरृत्यां वास्तुपीठं तु तद्वत्कुर्याद्विचक्षणः॥ योगिन्याः पीठकं कार्यं वायव्यां त
द्वदेव हि॥४॥ उत्तरे स्नानपीठं तु यज्ञशालाप्रमाणकं शुभं॥ पीठानि सर्वकार्याणि कोणमध्यगगर्भतः
॥५॥ एवं पीठादिकं कृत्वा स्थापयेत्तत्र देवतां यथाक्रमं यथास्थानं स्थापनं क्रमतः स्मृतं॥६॥ विधि
वत्स्वस्वपुस्तकेन स्थापयेत्॥ पश्चाद्दशावतारं स्थापयेत्॥ मध्यवेद्योपरि वेद्यास्तु सर्वभागे द
शावतारार्थे दशकलशान् स्थापयेत्॥ आ॰ प्रा॰ अत्राद्येति॰ श्रीविष्णोः दशावतारार्थे मत्स्यादिक
ल्की पर्यंतानां आवाहन स्थापन प्रतिष्ठा पूजनमहं करिष्ये॥ भूरसीत्यादिकलशस्थापनं

॥१३॥ ॥ अत्राद्य० मूर्तीनां टंकणछेददाहादिदोषपरिहारार्थं वन्ह्युत्तारणपूर्वकं तथाच दशविधिस्नान
महं करिष्ये ॥ अस्मन्नूर्जं सहद्राक्षचापंठेत् ॥ समुद्रस्य त्वा० १ हिमस्य त्वा० २ अपामिदं ३ नमस्ते
हर ४ प्राणदा० ५ इति वन्हिसूक्तं ॥ अथ दशविधिस्नानं ॥ ईशानस्य कृत्णो इति भस्मस्नानं १ स्यो
नापृथि० मृत्तिका० २ मानस्तोके इति गोमयं ३ गायत्र्या गोमूत्रं ४ ॥ आप्यायस्वेति पयस्नानं ५ ॥
दधिक्राव्णोति दधि ६ देवस्येति कुशोदकं ७ ॥ याः फलिनी फलं ८ ॥ या ओषधीः सर्वौषधी ।
९ आपो अस्मान्तीर्थोदिकस्नानं १० ॥ कलशे पात्रे वा मूर्तीनां स्थापनं ॥ ततो प्रतिष्ठां कुर्या
त् हस्ते अक्षतानादाय ॥ मनोजूतिमंत्रं पठित्वा मत्स्य १ कूर्म २ वराह ३ ॥ नारसिंह ॥ ४
वामन ५ परशुराम ॥ ६ ॥ रघुराम ॥ ७ ॥ श्रीकृष्ण ८ बुद्ध ॥ ९ ॥ कल्की १० ॥ दशावतारस राम ॥१३॥
परिवारेषु सकलशाः मूर्तिसहिताः सुप्रतिष्ठा वरदा भवंतु ॥ प्रतिष्ठेति इदमंत्रं चंदनं पु

ध्यं ॥ मत्स्याय नमः ॥ कूर्माय नमः ॥ वराहाय ॥ नारसिंहाय ॥ वामनाय ॥ परशुरामाय ॥ रघुरा
माय ॥ श्रीकृष्णाय ॥ बुद्धाय ॥ कल्कीने नमः ॥ मत्स्यादिकल्कीपर्यंतं कुर्यं ॥ गन्धा ॥ धूपं ॥ दी
पं ॥ फलार्घ नैवेद्यं ॥ दक्षिणामुखवासं समर्पयामि ॥ आरार्तिकं ॥ अद्यपूर्व मत्स्यादिकल्की
पर्यंतानां पूजनकृतं प्रीतामस्तु ॥ ॥ आचमनं वैष्णवं कार्यं ॥ प्राणायामः ॥ अथ विष्णुर्यो
गे विष्णुयंत्रदेवतानां सावरणानां पूजनविधि लिख्यते ॥ अत्राद्य मम देहशुद्ध्यर्थं कायिक
वाचिक सांसर्गिक सर्वपापक्षयार्थं कल्याणावाप्तये विष्णुयज्ञाख्य कर्म प्रारंभ निमित्तं विष्णोः
आवाहनस्थापन प्रतिष्ठा षोडशोपचार सावरणानां पूजनमहं करिष्ये ॥ प्रथमं देहन्या
सः ॥ यथा देहे तथा देवे न्यासः ॥ ॐ अनंताय नमः पादौ जानुनो विश्वरूपिणे ॥ ऊरुभ्यां
श्रीपतिश्चैव कटिं दामोदराय च ॥ कंदर्पाय नमो गुह्यं हृदयं श्रीवत्सधारिणे ॥ चक्रिणे वा

मबाहोश्चदक्षिणेणगद्विनेनमः ॥ उदकोपस्पर्शः ॥ मुखेयज्ञमुखश्चैव नाशायांशोकनाशनः ॥ वासु
देवायचक्षुषि ललाटे रामनामये ॥ रामेतिचभ्रुवोर्मध्ये सर्वात्मानं शिखांन्यसेत् इतिन्यासः ॥ अथ
ध्यानं ॥ इंद्वारण्यगकल्पपादपतलेसरत्नपीठेभुजे ॥ शोणाभेवसुपत्रकेस्थितमनुपीतांबरालं
कृते ॥ जीमूताभ्रमनेकभूषणयुतंगोगोपगोपीवृतं गोविंदंस्मरसुंदरंमुनिस्तुतं वेणुंरणंतंस्म
रेत् ॥१॥ एवंध्यात्वा मानसोपचारैः संपूज्य ॥ लंपृथिव्यात्मकंगंधंकल्पयामि ॥ हंआकाशात्मकं
पुष्पं० यंवाय्वात्मकंधूपं ॥ रंवन्ह्यात्मकंदीपं० ॥ वंअमृतात्मकंनैवेद्यं० ॥ दशवारंमूलं
प्रजप्य एवंमनसासंपूज्य बाह्यपूजांकुर्यात् ॥ स्वर्णादि रचितपात्रे अष्टगंधादिनाषट्को
णं वृत्तं अष्टदलं वृत्तं चतुर्विंशतिदलं वृत्तं ॥ द्वात्रिंशद्दलं चतुरस्रं ॥ चतुर्द्वारशोभितं एवं
यंत्रंविलिख्यततः महावेद्योपरिसंस्थाप्य तत्रपुष्पांजलिंदत्वा ॥ प्रथमंविशेषार्घ्यंस्था

पनं कुर्यात्॥ तत्र पीठात्मनो मध्ये त्रिकोण षट्‌कोणवृत्त॥ चतुरस्रात्मकं भूमौ यंत्रं विलिख्य॥ मूलमु
च्चार्य॥ विष्णु आधारमंडलाय नमः॥ इति संपूज्य॥ षट्‌कोणे षडंगं संपूज्य॥ चतुरस्रे पूर्वादि नूर्णवो
लाय नमः॥ उं आग्नेयाय नमः॥ जं जालंधराय नमः॥ कामपीठाय नमः॥ इति संपूज्य॥ फडित्याधा
रं प्रक्षाल्य॥ ॐ विष्णोरर्घ्याधारं स्थापयामि॥ इति मंडलमध्ये संस्थाप्य॥ तदुपरि वन्हेर्दश कला
पूजयेत्॥ यं धूम्रार्चिषे नमः॥ रं उष्मायै नमः॥ लं ज्वालिन्यै नमः॥ वं ज्वालिन्यै नमः॥ शं विस्फुलिं
गिन्यै नमः॥ षं सुश्रियै नमः॥ सं सुरूपायै नमः॥ हं कपिलायै नमः॥ ळं हव्यवाहायै नमः॥ क्षं कव्य
वाहायै नमः॥ एवं प्रादक्षिण्येन संपूज्य॥ मं धर्मप्रद दशकलात्मने वन्हिमंडलाय श्रीविष्णो
रर्घ्याधाराय नमः॥ इत्याधारं संपूज्य॥ स्वर्णादिरचितपात्रं अस्त्रमंत्रप्रक्षालितं सुधूपवा
सितमादाय॥ श्रीविष्णोरर्घ्यपात्रं स्थापयामीत्याधारे संस्थाप्य॥ तदुपरि सूर्यस्य द्वादशक

॥ १५ ॥ ला: ॥ आदक्षिण्येन पात्रे पूजयेत् ॥ कं भं तपिन्यैनमः ॥ खं बं तापिन्यैनमः ॥ गं फं धूम्रायैनमः ॥ घं पं मरी
च्यैनमः ॥ ॐ ङं नं ज्वालिन्यैनमः ॥ ॐ चं धं रुच्यैनमः ॥ ॐ छं दं सुषुम्णायैनमः ॥ ॐ जं थं भोगदायैनमः ॥
झं तं विश्वायैनमः ॥ ञं णं बोधिन्यैनमः ॥ टं ढं धारिण्यैनमः ॥ ठं डं क्षमायैनमः ॥ एवं संपूज्य ॥ अं
अर्घ्यप्रद द्वादशकलात्मने सूर्यमंडलाय श्रीविष्णोरर्घ्यपात्रायनमः ॥ इति संपूज्य ॥ जलपात्रां
तरेणाऽऽदाय ॥ ॐ क्षं ळं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं
खं कं अः ॥ अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं ॥ इति विष्णुमूलमंत्रेण विलोमेन पठन्शु
द्धोदकेन पूरयेत् ॥ ततो जले सोमस्य षोडशकलाः पूजयेत् ॥ अं अमृतायैनमः ॥ ॐ आं मान
दायैनमः ॥ ॐ इं पूषायैनमः ॥ ॐ ईं तुष्ट्यैनमः ॥ ॐ उं पुष्ट्यैनमः ॥ ॐ ऊं रत्यै० ॥ ॐ ऋं धृत्यै० ॥ ॐ ॠं शशि राम
न्यैनमः ॥ ॐ ऌं चंद्रिकायै० ॥ ॐ ॡं कांत्यै० ॥ ॐ एं ज्योत्स्नायै० ॥ ॐ ऐं श्रियै० ॥ ॐ ओं प्रीत्यै० ॥ ॐ औं अंगदायै० ॥ ॥ १५ ॥
=प्रं =प्रं

ॐ अं पूर्णायै ॥ ॐ अः पूर्णामृतायै नमः ॥ ॐ उं कामप्रदषोडशकलात्मने सोममंडलाय विष्णोरर्घामृ
तायनमः ॥ इत्यर्घजले संपूज्य पुनः पूर्ववत्त्रिकोणेषु ॥ ॐ विष्णवे नमः ॥ ॐ नारायणनमः ॥ ॐ दामोद
रायनमः ॥ षट्कोणेषु अग्नीशासुरवायव्येषु मध्ये चतुर्दिक्षु च क्रमेण षडंगानि संपूज्य ॥
सूर्यमंडलादंकुशमुद्रया तीर्थान्यावाह्य ॥ गंगे च यमुने० ॥ मूलेन गालिनीमुद्रां प्रदर्श्य हुं इत्य
वगुंठ्य धेनुमुद्रयामृतीकृत्य ॥ स्वहृदये विष्णुमावाह्य ॥ शंखमुद्रया अवष्टभ्य योनिमुद्रया ॥
ईप्सितं गंधाक्षतादिभिः ॥ विष्णवे संपूज्य ॥ आग्नेयादिषु हृदयादिषडंगं संपूज्य ॥ मत्स्यमुद्रया छा
द्य ॥ मूलमष्टधा जपेत् ॥ इति विशेषार्घस्थापनं ॥ अर्घाद्दक्षिणतः प्रोक्षणीपात्रं ॥ तदुत्तरतः पा
द्यार्घ्य ॥ आचमनीय ॥ मधुपर्क दधिमधुघृतयुक्तकांस्यपात्रं ॥ स्नानीयपात्रं पुनराचमनी
यपात्रं ॥ इत्यादीनि पात्राणि सामान्यार्घवत् स्थापयेत् ॥ तेषु विशेषार्घांबु किंचित् कृत्य क्षिपेत्

॥१९॥ गंधाक्षतान्निक्षिप्य॥ एवंपात्राणिसंस्थाप्य॥ मूलेनाष्टवारं ह्रथ फट् अभिमंत्रयेत्॥ अर्घोदकेनात्मानं
पूजासाधनानिचत्रिः प्रोक्षयेत्॥ पीठपूजां कुर्यात्॥ ॐमंडूकायनमः॥ ॐकालाग्निरुद्राय०॥ आधारश
क्त्यैनमः॥ ॐकूर्मायनमः॥ ॐधरायैनमः॥ ॐअमृतसागरायनमः॥ ॐश्वेतद्वीपायनमः॥ ॐकल्पवृक्षे
भ्योनमः॥ ॐमणिकुम्यायनमः॥ हेमपीठायनमः॥ इतिसंपूज्य॥ आग्नेयादि॥ ॐधंधर्मायनमः ॐज्ञां
ज्ञानायनमः॥ ॐवैंवैराग्यायनमः॥ ऐं ऐश्वर्यायनमः॥ ॐअंअधर्मायनमः॥ ॐअंअज्ञानायनमः॥ ॐअंअ ॐअं अधर्मायनमः
वैराग्यायनमः॥ ॐअंअनैश्वर्यायनमः॥ ॐअंअनंतायनमः॥ ॐतत्त्वमयपद्मायनमः॥ ॐआनंद
कंदायनमः॥ ॐसंसंविन्नालायनमः॥ ॐविकारमयकेसरेभ्योनमः॥ ॐप्रकृतिमयपत्रेभ्योनमः॥
पंचाशद्वर्णबीजाढ्यकर्णिकायैनमः॥ अंसूर्यमंडलाय द्वादशकलात्मनेनमः॥ मंवन्हिमंड राम
लायदशकलात्मनेनमः॥ ॐसंसत्त्वायनमः॥ ॐरंरजसेनमः॥ ॐतंतमसेनमः॥ ॐआंआत्मने० ॥१९॥

॥ ॐ अं अंतरात्मने नमः ॥ ॐ पं परमात्मने नमः ॐ ह्रीं ज्ञानात्मने नमः ॥ ॐ मां मायातत्वाय नमः ॥ ॐ कं कला
तत्वाय नमः ॥ ॐ विं विद्यातत्वाय नमः ॥ ॐ पं परतत्वाय नमः ॥ ततः पीठशक्तीनां पूजनं ॥ पूर्वादिच
तुर्दलदिक्षु मध्ये च ॥ ॐ विमलायै नमः ॥ ॐ उत्कर्षिण्यै नमः ॥ ॐ ज्ञानायै नमः ॥ ॐ क्रियायै नमः ॥ योगायै
नमः ॥ ॐ प्रह्व्यायै नमः ॥ ॐ सत्यायै नमः ॥ ॐ ईशानायै नमः ॥ ॐ अनुग्रहायै नमः ॥ ॐ नमो भगवते
विष्णवे सर्वभूतात्मने वासुदेवाय सर्वभूतात्मसंयोगयोगपद्मपीठात्मने नमः ॥ ततो मूलेन मू
र्तिं प्रकल्प्य ॥ त्रिखंडमुद्रया पुष्पांजलिं गृहीत्वा ध्यायेत् ॥ हस्ते बिभ्रत्सरसिजगदाशंखचक्रा
णिविद्यां ॥ पश्चादंशेकिनककलशंमेघविद्युद्विलासं ॥ वामोत्तुंगस्तनमविरलाकसमाश्लेषलो
भाद्देकीभूतं वपुषवतु वःपुंडरीकाक्षलक्ष्म्योः ॥ २ ॥ ध्यानांतरं नृसिंहस्य ॥ श्रीमन्नकेसरि
तनो जगदेकबं श्रीनीलकंठ करुणार्णव सामराज ॥ वन्हीदुतीत्रकरनेत्रपिनाकपाणे ॥
धो

॥१७॥ श्रीतांगछशेखर रमेश्वर पाहि विश्वोः ॥१॥ अथ ध्यानांतरं लक्ष्मीनृसिंहस्य ॥ क्षीराब्धौ वसुमु
खे देवनिकरे रम्यादिसंवेष्टितः ॥ शंखं चक्रगदां बुजं निजकरैर्बिभ्रन्त्रिनेत्रासितः ॥ सर्पाधीश
फणातपत्रलसितः पीतांबरालंकृतो ॥ लक्ष्म्याश्लिष्टकरे चरोनरहरिः स्तान्नीलकंठेसुदे १
॥ सहचंद्रप्रतिमोदयाद्युर्लक्ष्मीमुखालोकनलोलनेत्रः ॥ श्राव तारे परितः परितोन्न के
सरी मंगलसातनोतु ॥२॥ अथ ध्यानानंतरं गोपालस्य ॥ वंदारण्यगकल्पपादपतलेसद्रल
पीठे बुजे ॥ शोणाभे वसुपत्रके स्थितमलुपीतांबरालंकृतं ॥ जीमूताभमनेकभूषणयुतं गो
गोपगोपीवृतं गोविंदस्मरसुंदरं मुनियुतं वेणुरणंतं स्मरेत् ॥१॥ ध्यानांतरं श्रीकृष्णस्य ॥
॥ चिंतारत्नसुकनिजदोः परिलब्धकांतमालिंगितं सजलेन करेणपला ॥ सोवलीवोत्रसुत राम
हस्तमनेकभूषं ॥ पीतांबरं भजत कृष्णमभिष्टसिद्धौ ॥१॥ कल्पद्रुमूलसंरूढपद्मस्थं ॥१७॥

अथ ध्यानांतरं श्रीकृष्णस्य

चिंतयेद्धरिं ॥ कल्पद्रोरतिरम्यतमपल्लवेभ्यः प्रोद्भूतैर्मणिनिकरैः प्रसक्तमीत्रां ॥ ध्यायेयं कनक
निभांशुके वसानं ॥ भुंजानं दधि वनतीतयाप्यसानौ ॥ १ गोपालसंतानध्यानं ॥ विजयेन सुतो
रथस्थितः प्रसमानीयसमुद्रमध्यतः ॥ प्रददत्तनयान्द्विजन्मने स्मरणीयो वसुदेवनंद
नः ॥ २ ॥ ततो गरुडं ध्यायेत् ॥ तप्तस्वर्णनिभं फणींद्रनिकरैः कॢप्तांगभूषं प्रभुं ॥ स्मर्तॄणां शम
यंतमुग्रमखिलं नॄणां विषं तत्क्षणात् ॥ चंच्वग्रप्रचलद्भुजंगममभयं पाण्यो वरं बिभ्रतं प
क्षोच्चारितसामगीतिममलं श्रीपक्षिराजं भजे ॥ १ ॥ ततो हनुमंतो ध्यानं ॥ बालार्कायुततेजसं त्रि
स भुवनं प्रक्षोभकं सुंदरं ॥ सुग्रीवादिसमस्तवानरगणैः संसेव्यपादांबुजं ॥ नादेनैव समस्त
राक्षसगणान्संत्रासयंतं प्रभुं ॥ श्रीमद्रामपदांबुजस्मृतिपरं ध्यायामि वातात्मजं ॥ १ ॥ एवं
ध्यात्वा ॥ पुष्पाक्षतान्मंत्रोपरि मुक्त्वा ॥ आवाहयेत् ॥ मूलमुच्चार्य हृदयात् ॥ सुषुम्णावर्त्म

॥१८॥ नामहृद्वारेण अह्लरं ध्रस्यनासारं ध्रविनिर्गतं पुष्पांजलौ मात्रका ओ योजयित्वा विनिक्षिपेत् ॥ म
न्त्रैः पुष्पांजलिं चैव तदावाहनमीरितं ॥ शालिग्रामे स्थिरायां वा नावाहनविसर्जयेत् ॥ आवाहनादु
पचारेषु श्लोकान् शंसुदितान् पठेत् ॥ आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वर अरण्यामिव हव्यांशं
मूर्त्यां वावाहयाम्यहं ॥ अथ आवाहनादि अष्टमुद्राः प्रदर्श्य ॥ वेदोपवेदोपनिषद्भिः षडंगैः पुराणध
र्मशास्त्रमन्त्रैस्तथैव ॥ आहूयमानः सुरमर्त्यनागै राबाहनं स्वीकुरु वासुदेव ॥१॥ आवाहयामि दे
वेशं त्वामहं गरुडध्वज उपेत्य च महाभाग संसारादुद्धरस्व मां ॥ पुष्पैरापूजितांजलिरावाहन
मुद्रा सहस्रशीरुषेति श्रीविष्णोः आवाहितो भव ॥ देवेत्रि भक्तिसुलभे परिवारसमन्वि
ते यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिता भव ॥१॥ तवेयं महिमा मूर्तिस्तस्यां त्वां सर्वगं प्रभो राम
भक्तिस्नेहसमाकृष्टदीपवत्स्थापयाम्यहं ॥२॥ श्रीविष्णोः संस्थापिता भव ॥ सर्वांतर्यामिणे ॥१८॥

देव सर्व बीजमयं शुभं ॥ स्वात्मस्थाय परं शुद्धमासनं कल्पयाम्यहं ॥ मूल॰ श्रीविष्णोः आसनं स
मर्पयामि ॥ ॐ अनन्या तव देवेश मूर्तिशक्तिरियं प्रभो ॥ सांनिध्यं कुरु तस्यां त्वं भक्तानुग्रह तत्
पुरः २ मूल॰ श्रीविष्णोः संनिहितो भव ॥ आज्ञया तव देवेश कृपांबुधे गुणांबुधे ॥ आत्मानं
देव तत्स्थं त्वां संगुणाधिपितर्गुरो ॥ मूल॰ श्रीविष्णोः संनिरुद्धो भव ॥ ॐ अभक्ता वाङ्मनश्चक्षुः श्रो
अदूरायित पुले ॥ स्वतेजः पंजरेणाशु वेष्टितो भव सर्व ॥ मूल॰मु॰ श्रीविष्णोः अवगुंठितो भव ॥ म
र्त्यावयवसंपूर्णैः स्थिरो भव महेश्वर ॥ न्यसेत् षडंगं देवांगे सकलीकरणं सुधी ॥ मूलमु॰ श्री
विष्णोः सकलीकरणं ॥ षडंगेन ॥ अज्ञानाद्दुर्मनस्त्वाभ्यां वैकल्यात्साधनस्य च ॥ यजेत्पूर्णं न
विष्वक्ष्वं तदाय सन्मुखीभव ॥ मूलमु॰ संमुखीभव ॥ धेनुमुद्रया ॥ अमृतीकृत्य ॥ इति ॥ आवाह
नादि अष्टमुद्राः प्रसरर्पे ॥ ततो प्राणप्रतिष्ठां कुर्यात् ॥ तत्मुद्रया पुष्पं गृहीत्वा श्रीविष्णोः हृ

२९ ॥ दयं स्वाहेत् ॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः ॥ श्रीविष्णोः प्राणा इह प्राणाः ॥ ॐ आं ह्रीं श्रीविष्णोः
ति जीव इह स्थितः ॥ आं ह्रीं । श्रीविष्णोः सर्वेंद्रियाणि ॥ ॐ आं ह्रीं श्रीविष्णोः वाङ्मनश्चक्षुः श्रोत्र घ्रा
ण प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ मूलेन सप्तवारमावर्त्य ॥ इति प्राणप्रतिष्ठा ॥ ततोस
प्तदशमुद्राप्रदर्शं शंखचक्र। गदा पद्म कुंभ ॥ आदर्श ॥ छत्र ॥ मुसल ॥ किरीट ॥ कुंडलाक
र्ण श्रीवत्स कौस्तुभ ॥ वनमाला ॥ जगन्मोहिनी काम ॥ गरुड ॥ लक्ष्मी ॥ योनिमुद्रा ॥ इति स
प्तदशमुद्राप्रदर्श ॥ षोडशोपचारः ॥ पाद्यपात्रे श्यामाक ॥ दूर्वाब्ज विष्णुक्रांता ॥ इति पाद्यपात्रे
क्षिपेत् ॥ अर्घ्यपात्रे दुर्वा तिल दर्भाग्र सर्षप यव पुष्प अक्षत चंदनानि निक्षिप्य ॥ ततः आच
मनीयपात्रे जातिफलं ॥ लवंग ॥ कंकोलानि प्रक्षिप्य ॥ मधुपर्कपात्रे ॥ दधि आज्य ॥ मधुनि राम
क्षिप्य ॥ पाद्यादिपात्रेषु तत्तद्रव्याभावे अक्षतान् क्षिपेत् ॥ अथ आसनमंत्रः ॥ पुरुष एवं ॥ २९ ॥

दं इति मंत्रेण ॥१॥ नागादिनागाधिपयोगिलोक ॥ पद्मासनः पद्मकृतासनोपि ॥ प्रवालमुक्ता
मणिजातरूपं न्यस्तं हि सिंहासनमाश्रयेतत् ॥२॥ इदमासनमेवेहि हि मपीठसुनिर्मलं ॥ नि
वेदितं मया भक्त्या भगवन् प्रतिगृह्यतां ॥ मू० श्रीविष्णोः आसनं समर्पयामि ॥ एतावानस्येति
॥३॥ गृहाण पाद्यं निरवद्यकीर्ते श्रीपाणिपद्मांकितपादपद्म ॥ भूपालदिक्पालकिरीटर
त्नमरीचिनीराजितपादपीठ ॥४॥ यन्न्यक्तिलेशात्संपर्कात्परमानंदसंभवं ॥ तस्मै ते चरणा
ब्जाय पाद्यं शुद्धाय कल्पते ॥५॥ पाद्यपात्राज्जलमुद्धृत्य ॥ मूल० श्रीविष्णोः पादयोः दत्वा ॥ त्रि
पादूर्ध्वेति० गोपांगनाजनगजेंद्रमुखेश्वरेषोग्राघमद्रवपुष्कराद्यैः ॥ त्वं देव दत्तार्घ्यमिमं मम
प्यार्घ्यमंगीकुरु साक्षततोयमिश्रं ये ॥६॥ सुवर्णपात्रसंयुक्तं दधिदूर्वासमन्वितं ॥ अर्घ्य
मर्घ्यमिमं मया दत्तमर्घ्यं गृहाण त्वं मे हरिः ॥ अर्घ्याज्जलमुद्धृत्य शिरसि अर्घ्यं दत्वा ॥ मूल० श्रीवि

२० ष्णोः अर्घ्यं स० ॥ मधुपर्कपात्रात् मधुपर्कमुद्धृत्य ॥ सर्वकालुष्यहीनाय परिपूर्णसुखात्मके ॥ मधुप
र्कमिमं विष्णोः कल्पयामि प्रसीद मे ॥ १ ॥ म० मधुपर्कं मुखे दत्वा ॥ पंचामृतेन स्नानं ॥ पुरुषसूक्तेन
मूलमंत्रेण अष्टोत्तरशतं वा मामभिषिंचेत् ॥ २ ॥ तस्माद्विराड जेति आ० पुनराचमनं शंखोदकेना
चमनविधेहि कृपालपालोऽक्षपणेशा विष्णो ॥ श्रीकांत सर्वस्तुति गेयकीर्त्ते पादारविंद द्वयसत्ती
र्थपाद ॥ १ ॥ पुनराचमनं दद्यात् मूलश्लोकोत्तरं पठन् ॥ शुद्धिमज्ञोति तस्यैत्ते पुनराचमनी
यकं ॥ आचमनीयपात्राज्जलमुद्धृत्य मूलमुच्चार्य श्रीविष्णोः आचमनीयं मुखे दत्वा ॥ तस्मा
द्यज्ञात् सर्वहुतः संभृतं० स्नानीयं ॥ चांपेयतैलात् घृष्टपमर्दनेन तं स्नाहि दैत्यांच यमर्दनेन ॥ राम
नृसिंह क्षीराब्धिपरंपरासु ॥ देवीरमावारिविलासवत्प ॥ १ ॥ सर्वस्मिंस्तु द्रासरितः तीर्थानि
निखिलानि च ॥ स्नानार्थं च प्रवक्ष्यामि तुभ्यं देव जगत्पते ॥ २ ॥ हरिद्राचूर्णैः गंधतैलैः स्नापयेत् ॥ २० ॥

॥ पुनराचमनपात्राज्जलमुद्धृत्य मूल० श्रीविष्णोः सर्वांगि स्नानं सम० स्नानांते आचमनीयपात्राज्जलमु॥
द्धृत्य आचमनं मुखे दत्वा ॥ तस्माद्यज्ञात्सर्वहुत ऋचः वस्त्रं ॥ पीतं पवित्रं विमलं दूकूलवासो वसानेच
शुद्धवस्त्रनो ॥ आदर्शमालोकय विश्वमूर्ते रूपाकटाक्षेण इमो च मांच ॥१॥ मायाचित्रपटच्छिन्ननिजगु
ह्योरुतेजसे ॥ निरावरणविज्ञानवाससे ते कल्पयाम्यहं ॥१॥ यमाश्रित्य महामाया जगत्संमोहिनी सदा ॥
॥ तस्मै ते परमेशाय कल्पयाम्युत्तरीयकं ॥२॥ इदमाच्छादनं तेस्तु सुखवत्सं दुकूलमेवच ॥ त्रिक्षामात्रेण
माम धद्यत्राता साध्यप्रभो ॥३॥ मूल० श्रीविष्णोः पीतं दुकूलं स० वस्त्रांते आचमनं स० ॥ तस्माद्श्वा
अजायंत० उपवितं ॥ चामीकरं त्रिप्रवरं वरेण्यं यज्ञोपवीतं भजदेवदेव ॥ द्विजन्मजन्मास्तु यदाकद्रा
वित्तगुणत्रयं बंधविमोचनं वा ॥१॥ उपवितं भूषणानीत्र यच्छेदुभयं पठन् ॥ यस्य शक्तित्रयेणे
दं संप्रोतमखिलं जगत् ॥ यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पयेत् ॥ यज्ञोपवीतं परमं दवितं

२१ नव तंतुभिः निवेदितं मयाभक्त्या भगवन् प्रतिगृह्यतां । मूलमुच्चार्य । श्रीविष्णोः यज्ञोपवितं स० । तं यु
ह्णेति चंदनं । कस्तूरिकाकुंकुमचित्रचारुश्रीचंदनैः श्रीसविलेपयांगं । तापत्रयं तेन विलेपनेन देव
स्य सर्वस्य जनस्य विष्णोः १ स्वभावसुंदरां गाय नानाशाखापाशायाम्यते । भूषणानि विचित्राणि कल्प
याम्य[illegible]मरार्चितं २ मूलमंत्र प्रपुटितमेकैकं मातृकाक्षरं । विन्यसे देवतांगेषु योगोऽयं लोकमोह
नः इति भूषणानि ॥ मलयाचलसंभूतं हृद्यानंदवर्द्धनं ॥ शीतलं गंधसाराढ्यं चंदनं प्रतिगृह्यतां
कुंकुमं चंदनं चैव श्रीखंडं देववल्लभं ॥ मयादत्तं च शिखंडमखंड दत्त हेतवे ॥ मूल० श्रीविष्णोः
चंदनं स० अनामिकांगुष्ठयोगेन गंधमुद्रां प्रदर्श्य पात्रस्थं गंधं समर्पयेत् ॥ यत्पुरुषं व्यदधुः
पुष्पं० ॥ विहितः पुष्पांजलिस्ते तत्तो मे यत्तो भवान् दत्तजलांजलिस्यात् सम्यक् तदा पूज्य समग्र राम
पुष्पैर्दत्तं मयैकं तुलसीदलं ते १ अनेकजातिपुष्पाणि सुरभीनि बहूनि च । निवेदितं म ॥२१॥

पाभस्तपा भगवन् प्रतिगृह्यतां ॥ मूलमुच्चार्य ॥ श्रीविष्णोः पुष्पंस- ॥ तर्जन्यंगुष्ठयोगेन पुष्पमुद्रां प्र
दर्शय ॥ पुष्पं पत्रं फलं देवे न प्रदद्यादधोमुखं ॥ पुष्पांजलौ न तद्दोषस्तथा प्रमुदितस्य च ॥ त्राक्षोदुर्वीद
योनिर्वीधाः ॥ मरालध्वास्तु दुर्वा प्रशस्ता ॥ तुलसी बकुलो द्रोणश्चंपकश्च सरोजनी ॥ बिल्वकल्हा
र दमनास्तथा मरुबकः कुशः ॥ दुर्वादि बिल्वा पामार्ग विष्णुक्रांता मुनिद्रुमः ॥ धात्रीसुता नामेते षांप
त्रैः कुर्यात् सुरार्चनं ॥ सुवर्णपुष्पं तुलसी नैव निर्माल्यतां व्रजेत् ॥ तुलसी तु हरेः प्रियाः ॥ धूप ॥ दीप ॥ वाद्य
भोगाद्यं नैवेद्यं ॥ फलमर्घ्यं मुखवासं तांबूलं समर्पयामि ॥ मूलेन दक्षिणां समर्पयामि ॥ अत्रावस
पूजा रे यंत्रावरणं कुर्यात् ॥ पुष्पपूजां विविधायैश्च कुर्यादावरणार्चनं ॥ अंगादि दिक्पतेस्त्रस्तं तत
तो धूपादिकं चरेत् ॥ पुष्पमक्षतैन आवरणं पूजयेत् ॥ षट्कोणमध्ये क्लीं कृष्णाय नमः ॥
इति मध्ये ॥ षट्कोणे षडंगानि पूजयेत् ॥ अग्निकोणे हृदयाय नमः ॥ हृदयत्राक्षाय नमः ॥ ईशान

॥२२॥ कोणे शिरसे स्वाहा॥ शिरःशक्त्यैनमः॥ नैरृति कोणे शिखायै वषट्॥ शिखाशक्त्यैनमः॥ वायव्यकोणे कव
चायहुं॥ कवचशक्त्यैनमः॥ अग्रेनेत्रत्रयाय वौषट् नेत्रशक्त्यैनमः॥ सर्वासुदिक्षु अस्त्राय फट्॥
अस्त्रशक्त्यैनमः॥ ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पयेत्तुभ्यं प्रथमावरणा
र्चनं॥ इति मध्ये पुष्पांजलिः॥ अर्घादिकेन प्रथमावरणपूजां समर्पयामि॥ एवं सर्वत्र॥ ततोऽष्टपत्रे
षु॥ पूर्वादि॥ गरुडायनमः॥ शंकरायनमः॥ शेषनागायनमः॥ शतानंदायनमः॥ विदिक्षु॥ श्रियैन
मः॥ ह्रियैनमः॥ धृत्यैनमः॥ पुष्ट्यैनमः॥ अभि॰ सि॰॥ द्वितीयावरणार्चनं॥ २॥ पुनस्तत्रैव पूर्वादि॥ ॐ
भास्वत्यैनमः॥ ॐ भास्कर्यैनमः॥ ॐ चिंतायैनमः॥ ॐ द्युत्यैनमः॥ ॐ उन्मलिन्यैनमः॥ ॐ रमायैनमः॥
ॐ कांत्यैनमः॥ ॐ रुच्यैनमः॥ ततः पुष्पांजलिः॥ अभीष्ट॰॥ तृतीयावरणार्चनं॥ ३॥ पुनस्तत्रैव अष्ट राम
दले पूर्वादि॥ ॐ रुक्मिण्यैनमः॥ ॐ सत्यभामायैनमः॥ ॐ नाग्निजित्यैनमः॥ ॐ कालिंद्यैनमः॥ ॐ मित्र॥ २२॥

ंदायै नमः। ॐ लक्ष्मणायै नमः। ॐ जांबुवत्यै नमः। ॐ सुशीलायै नमः॥ अभिष्टसि०। चतुर्था
वरणार्चनं। ४। ततोऽष्टदलाग्रे। वसुदेवायनमः। देवक्यै नमः। नंदायनमः। यशोदायनमः। गो
पतये नमः॥ बलभद्रायनमः। सुभद्रायै नमः। गोपिकाभ्यो नमः॥ अभिष्टसि०। पंचमावरणार्च
नं॥ पुनस्तत्रैव। अष्टदलाग्रेषु ॐ लक्ष्म्यै नमः। ॐ सरस्वत्यै नमः॥ ॐ रत्यै नमः॥ ॐ प्रीत्यै नमः॥ ॐ
कीर्त्यै नमः॥ कांत्यै नमः। ॐ तुष्ट्यै नमः। ॐ पुष्ट्यै नमः॥ ५॥ अभिष्टसि०॥ षष्ठावरणार्चनं॥ ६॥ पुनस्त
त्रैव। ॐ महापद्मायनमः। ॐ पद्मायनमः। ॐ शंखायनमः॥ ॐ मकरायनमः॥ ॐ कच्छपायनमः।
ॐ मुकुंदायनमः॥ ॐ कुंदायनमः। ॐ नीलायनमः॥ ॐ अभिष्टसि०॥ सप्तमावरणार्चनंनं। ७॥
ॐ पंचबाणायनमः॥ ॐ वासुदेवायनमः॥ ॐ संकर्षणायनमः॥ ॐ प्रद्युम्नायनमः॥ ॐ अनिरु
द्धायनमः। ॐ रुक्मिण्यै नमः। ॐ सत्यभामायै नमः॥ ॐ लक्ष्मणायै नमः॥ ॐ जांबुवत्यै नमः॥ ॐ संक्रं

२३ दनादिभ्यो नमः ॥ अभीष्टसि० ॥ अष्टमावरणार्चनं ॥ ८ ॥ ततश्चतुर्विंशतिदलेषु ॥ ॐ केशवाय नमः
ॐ जनार्दनाय नमः ॥ ॐ दामोदराय नमः ॥ ॐ अधोक्षजाय नमः ॥ ॐ श्रीधराय नमः ॥ ॐ त्रिविक्रमाय
नमः ॥ ॐ वासुदेवाय नमः ॥ ॐ माधवाय नमः ॥ ॐ संकर्षणाय नमः ॥ ॐ विष्णवे नमः ॥ ॐ हृषीकेशाय नमः
॥ ॐ अच्युताय नमः ॥ ॐ प्रद्युम्नाय नमः ॥ ॐ अनिरुद्धाय नमः ॥ ॐ मधुसूदनाय नमः ॥ ॐ पद्मनाभाय
नमः ॥ ॐ गोविंदाय नमः ॥ ॐ नृसिंहाय नमः ॥ ॐ वामनाय नमः ॥ ॐ उपेंद्राय नमः ॥ ॐ हंसाय नमः ॥ ॐ
पुरुषोत्तमाय नमः ॥ ॐ कृष्णजिते नमः ॥ ॐ नारायणाय नमः ॥ २४ ॥ ॐ अभीष्ट० ॥ नवमावरणार्च
नं ९ ॥ ततो द्वात्रिंशद्दले ॥ पूर्वादि ॥ ॐ कल्पाय नमः ॥ ॐ रुद्राय नमः ॥ ॐ महाघोराय नमः ॥ ॐ भीमा
य नमः ॥ ॐ भीषणाय नमः ॥ ॐ उज्ज्वालाय नमः ॥ ॐ करालाय नमः ॥ ॐ विकरालाय नमः ॥ ॐ दैत्यां तम
तकाय नमः ॥ ॐ मधुसूदनाय नमः ॥ ॐ रक्ताक्षाय नमः ॥ ॐ पिंगलाक्षाय नमः ॥ ॐ अंजनाय नमः ॥ २३ ॥

ॐ दीप्ततेजसे नमः ॥ ॐ सुघोराय नमः ॥ ॐ सरुमाय नमः ॥ ॐ विश्वाय नमः ॥ ॐ राक्षसांतकाय नमः ॥
ॐ विशालाय नमः ॥ ॐ धूम्रकेशाय नमः ॥ ॐ हयग्रीवाय नमः ॥ ॐ घनस्वनाय नमः ॥ ॐ मेघनादाय नमः
ॐ मेघवर्णाय नमः ॥ ॐ कुंभकर्णाय नमः ॥ ॐ कृतांतकाय नमः ॥ ॐ तीव्रतेजसे नमः ॥ ॐ अग्निवर्णाय न
मः ॥ ॐ महोग्राय नमः ॥ ॐ विश्वभूषणाय नमः ॥ ॐ त्रिविक्रमाय नमः ॥ ॐ महासेनाय नमः ॥ ३२ ॥ ॐ अभी
ष्टसि० ॥ दशमावरणार्चनं ॥ १० ॥ ॐ लं इंद्राय नमः ॥ ॐ रं अग्नये नमः ॥ ॐ मं यमाय नमः ॥ ॐ क्षं निर्ऋतये
नमः ॥ ॐ वं वरुणाय नम ॥ ॐ यं वायवे नमः ॥ ॐ सं सोमाय नमः ॥ ॐ हं ईशाय नमः ॥ ॐ आं ब्रह्मणे न ॥ ॐ ह्रीं
अनंताय नमः ॥ अभीष्ट० ॥ एकादशावरणार्चनं ॥ ११ ॥ ॐ वज्राय नमः ॥ ॐ शं शक्तये नमः ॥ ॐ दं दंडाय
नमः ॥ ॐ खड्गाय नमः ॥ ॐ पाशाय नमः ॥ ॐ अं अंकुशाय नमः ॥ ॐ गदायै नमः ॥ ॐ त्रिशूलाय नमः ॥ ॐ ।
पद्माय नमः ॥ ॐ चक्राय नमः ॥ ॐ अभीष्टसि० ॥ द्वादशावरणार्चनं ॥ १२ ॥ ऐरावताय नमः ॥ ॐ मेषाय न

॥२४॥ मः ॥ ॐ महिषायनमः ॥ ॐ प्रेतायनमः ॥ ॐ मकरायनमः ॥ ॐ मृगायनमः ॥ ॐ तुरंगायनमः ॥ ॐ वृषभायनमः ॥
ॐ हंसायनमः ॥ ॐ गरुडायनमः ॥ ॐ अभिष्ट सि० ॥ ॐ पक्षिराजायनमः ॥ नागान्संपूजयेत् ॥ ॐ अनंतायनमः
॥ ॐ वासुदेवायनमः ॥ ॐ तक्षकायनमः ॥ ॐ कर्कोटिकायनमः ॥ ॐ पद्मायनमः ॥ ॐ महापद्मायनमः ॥ ॐ
शंखपालायनमः ॥ ॐ कुलिकायनमः ॥ ॐ ह्रों हनुमतयेनमः ॥ अथविष्णोद्वारपालान्संपूजयेत् ॥ पूर्वद्वा
रे ॥ नंदायनमः ॥ सुनंदायनमः ॥ दक्षिणद्वारे ॥ चंडायनमः ॥ प्रचंडायनमः ॥ पश्चिमद्वारे ॥ बलायनमः
प्रबलायनमः ॥ उत्तरद्वारे ॥ भद्रायनमः ॥ सुभद्रायनमः ॥ अभीष्ट सि० सर्वावरणार्चनं ॥ इतिआवर
णपूजां विधाय ॥ आघ्राणोसीति धूपं ॥ धूपोनुरूपोऽगरुगुग्गुलाद्यैरुद्भावितः प्रीतिकृदात्मनेस्तु ॥ सं
दह्यतां तेभजनाईनाथमकामकामोद्भवमादरेस्तु स्वर्कैः ॥ १ ॥ धूपपात्रस्थितांगारे क्षिप्त्वागुरुपुष्टिकं ॥ वन राम
स्पतिरसो दिव्यो गंधाढ्यः सुमनोहरः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ १ ॥ फट् इतित्रो ॥२४॥

क्ष्म ॥ नमः इति पुष्पं समर्पयामि ॥ वामतर्जन्यां संस्पृश्य ॥ मूलं॰ श्रीविष्णोः सांगाय सपरिवाराय विष्णवे धूपं
समर्पयामि ॥ इति शंखोदकं भूमौ क्षिपेत् ॥ धूपमुद्रां प्रदर्शयेत् ॥ तर्जनीमूलयोरंगुष्ठयोगो धूपमुद्रा ॥
तर्जन्यंगुष्ठयोगेन घंटामर्चयेत् ॥ जगद्ध्वनिमंत्रमातः स्वाहा ॥ इति घंटां संपूज्य ॥ वामहस्तेन घंटां वादयन्
देवतागुणकीर्तयन् दक्षहस्तेन देवतानाभिदेशतः धूपयेत् ॥ अंजलौ पुष्पांजलिं दद्यात् ॥ इति धू
पं ॥ चंद्रमामनसेति॰ दीपं ॥ मुकुंदमृदंगादिमृदुस्वनैश्च संस्तूयमाने सुरदेवनागैः ॥ भक्त्या तु बाल
व्यजने गृहाण कर्पूरनीराजनमादि विष्णोः ॥ १ ॥ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ॥ सबाह्याभ्यं
तरं ज्योतिर्दीपोयं प्रतिगृह्यतां ॥ ततो दीपं प्रज्वाल्य फट् इति संप्रोक्ष्य ॥ नमः इति पुष्पं समर्प्य वाम
मध्यमया संस्पृश्य ॥ शंखोदकेन जलं भूमौ क्षिपेत् ॥ मध्यमांगुष्ठयोगतः दीपमुद्रां प्रदर्श्य दी
पदानं नेत्रे प्रदेशे ॥ मूलं॰ सांगाय सपरिवाराय श्रीविष्णवे दीपं सम॰ ॥ ततो नैवेद्यं ॥ देवाग्रे चतु

॥२५॥ रस्रं मंडलं कृत्वा ॥ साधारपात्रं प्रक्षाल्य ॥ संस्थाप्य ॥ साधारोपरि स्वर्णादिरचिते नैवेद्यपात्रं निधाय ॥
नैवेद्यपात्रे शर्करादिनानाविधपक्वान्नादिपायसादिफलफलादिकं यथाशक्ति परिवेष्य ॥ फडिति
जलैः संप्रोक्ष्य ॥ चक्रमुद्रां प्रदर्श्य ॥ तन्मंत्रितैर्जलैः नैवेद्यं संप्रोक्षयेत् ॥ यं इति बीजेन द्वादश
वारं नैवेद्यं संप्रोक्ष्य ॥ वायुबीजोत्थमारुतैः नैवेद्यदोषं संशोष्य ॥ दक्षिणकरे रं बीजं विचिंत्य ॥ द
क्षिणकरपृष्ठे वामकरं दत्वा नैवेद्यं प्रदर्श्य ॥ रं इति अग्निबीजोत्थाग्निनाखिलं नैवेद्यदोषं दग्ध्वा ॥
वामकरे वं इति अमृतबीजं ध्यात्वा ॥ तत्पृष्ठे दक्षहस्तं दत्वा ॥ नैवेद्यं प्रदर्श्य ॥ वं इति अमृतबी
जोत्थअमृतधारया नैवेद्यं आप्लावितं स्मृत्वा ॥ मूलेन संप्रोक्ष्य ॥ तत् नैवेद्यं स्पृष्ट्वा ॥ तदुपरि अ
ष्टवारं मूलमंत्रं जप्त्वा ॥ धेनुमुद्रां प्रदर्श्य ॥ चंदनपुष्पैः संपूज्य ॥ देवमु[illegible]खस्फोजतं तेजः विचिंत्य राम
॥ वामांगुष्ठेन नैवेद्यभाजनं संस्पृश्य ॥ दक्षहस्तेन जलं गृहीत्वा ॥ नाम्ना आसीदं० सत्पात्रसि ॥२५॥

ॐ क्षुद्विविधविधानेकभक्ष्यालं । निवेदयामि देवेश सानुगाय गृहाणतत् स्वाहा ॥ १ ॥ इति दक्षिणहस्त
स्थितं जलं भूमौ क्षिपेत् । अनामिकामूलयोरंगुष्ठयोगो नैवेद्यमुद्रां प्रदर्श्य । ततः सपुष्पाभ्यां नैवेद्य
पात्रं त्रिप्रोक्ष्य नमो भगवते विष्णवे निवेदयामि । पद्माभोमहस्त । ततो ग्रासमुद्रां प्रदर्श्य । ततः प्राणाद्याकृतिः
कनिष्ठानामिकांगुष्ठैः । ॐ प्राणाय स्वाहा । तर्जनीमध्यमांगुष्ठैः ॐ अपानाय स्वाहा । अनामिकामध्य
मांगुष्ठैः । ॐ व्यानाय स्वाहा । अंगुष्ठतर्जनिअनामिकाभिः । ॐ उदानाय स्वाहा । सर्वांगुलिभिः । ॐ स
मानाय स्वाहा । ततो जवनिकां धृत्वा । ब्रह्मेशाद्यैः सुरेन्द्रैः परिवृतउरुभिः स्वप्रविष्टैः समेतो लक्ष्मा
सिंजद्वलयकरस्यासादरं वीज्यमानः । नर्मक्ष्वेलैः प्रहसनमुखैः हास्यपङ्क्तिर्भोजयन् । भुक्तेपा
त्रे कनकघटिते षड्रसं श्रीरमेशः ॥ १ ॥ शालीभक्तं सुपक्वं शिशिरकरसितं पायसं सूपसूपं । लेह्यं प
ह्यं च चोष्यं सितममृतफलं घाटिकाद्यं सखाद्यं । आज्यं प्राज्यमज्यं नयनरुचिकरं राजिके रामरी

॥ २६ ॥ चरवादीयसाकराजिपरिकरममृताहरजोषंजुषस्व ॥ २ ॥ ततोजवनिकामपाकृत्य ॥ मूलमं० सांगाय
सपरिवारायश्रीविष्णोः नैवेद्यंसम० ॥ नैवेद्यांतेआचमनंसमर्प० स्वर्णादिपात्रेकुर्मीकपूरादिवासितं
जलंदद्यात् ॥ नैवेद्यमेतद्भगवंनिवेदितंचतुर्विधंपक्कमदोषमन्नं ॥ स्निग्धेनसुक्तंसुधयासमन्वितं
चतुर्विधोभूतगणोभ्युपैतु ॥ १ ॥ समस्तदेवदेवेशसर्वतृप्तिकरंपरं अखंडानंदसंपूर्णंगृहाण
जलमुत्तमं ॥ सत्पान्नंसपक्वान्नंसमस्तजलमुत्तमं ॥ निवेदितंमयाभक्त्याभगवन्प्रतिगृह्य
तां ॥ १ ॥ मू० श्रीविष्णोः अमृताभिधानमसिस्वाहेतिउत्तरापोशानजलंदत्वा ॥ करास्यप्रक्षालना
र्थंगंडूषान्कारयित्वा ॥ यत्पुरुषेणेतिफलतांबूलं ॥ पुष्पपत्रंफलंतोयंजंबीजंबीजपूरकं ॥ अय
सर्घेमयादत्तमर्घंगृह्णातुकेशवः ॥ १ ॥ नागवल्लीदलंदिव्यंपुंगीफलसमन्वितं ॥ कर्पूरेणसमायुक्तं ताम
तांबूलंप्रतिगृह्यतां ॥ २ ॥ मूल० श्रीविष्णोः मुखवासतांबूलंस० दक्षिणां ॥ हिरण्यगर्भगर्भस्त्वंहे ॥ २६ ॥

मबीज० ॥ ततो आदर्शं ॥ तत्र आदर्शेनेन देवं मुखमवलोक्य ॥ पठेद्देवमनामूलत्वा सार्द्धश्लोकचतु
ष्टयं ॥ बुद्धिः सवासना कृष्ण दर्पणं मंगलानि च ॥ मनोवृत्तिविचित्रा ते नृत्यरूपेण कल्पिता ॥ १ मू० श्रीवि
ष्णोः आदर्शं ॥ छत्रं ॥ ध्वनयोगीतरूपेण शङ्खवाद्यप्रभेदतः ॥ छत्राणि तव पद्मानि कल्पितानि मया
प्रभो ॥ २ मूल० श्रीविष्णोः छत्रं स० ॥ चामरं ॥ सुषुम्णाध्वजरूपेण प्राणाद्यश्वमयात्मना ॥ अहंकारो ज
गलेन विगन्धवोरथात्मना ॥ १ श्रीविष्णोश्चामरं स० ॥ ततो पादुका ॥ इंद्रियाण्यश्वरूपाणि पादु
कारूपवर्त्मना ॥ मनप्रग्रहरूपेण बुद्धिसारथिरूपतः ॥ २ ॥ सर्वमन्यत्तथारूढं तवोपकर
णात्मना ॥ लोकानेतान्प्रपवित्रान्मूलमंत्रमनन्यधिः ॥ ३ ॥ मूल० श्रीविष्णोः पादुकां स०
इति राजोपचारांश्च निवेद्य आरात्रिकं कुर्यात् ॥ कांस्यादिकृत पात्रे चंदनादिना अष्टदलं
कृत्वा ॥ तन्मध्ये अष्टदलेषु चपिष्टमयान्नव दीपान् घृतपूर्णान् कर्पूरगर्भवर्त्तिसहितान्नि

॥ २७ ॥ धायह्रीं इति दीपान् प्रज्वाल्य वमिति धेनुमुद्रां प्रदर्श्य अस्त्रमंत्रेण चक्रमुद्रया संरक्ष्य मुखांते थक
रभ्यर्च्य ॥ तत्पात्रं कराभ्यामादाय ॥ उत्थाय ॥ मूलमुच्चार्य श्रीविष्णोः चरणांतं च पुनः भ्रामयन् निराजये
त् ॥ अग्निर्देवता० ॥ श्रीश्चते ति० मंत्रेण आरात्रिकं कृत्वा ॥ सामान्यार्घोदकेन घंटा आरात्रिकं च प्रोक्ष
येत् ॥ हस्तौ प्रक्षाल्य ॥ महापुष्पांजलिं गृहीत्वा ॥ इति पुष्पांजलिः ॥ यथाशक्ति मूलं जपित्वा ॥ यथाश
क्ति जपित्वा तं मंत्रेण विनिवेदयेत् ॥ क्षिपं नर्घस्य पानीयं देवतादेवता दक्षिणे करे ॥ गुह्यातिगुह्य
गोप्ता त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थिता ॥ दत्वा पराङ्मुखं चार्घ्यपुष्पैः
स्तोत्रैः प्रपूजयेत् ॥ दंडवत्प्रणिपत्यैवं देवे कुर्यात्प्रदक्षिणः ॥ सप्तास्यास्तन्त्र· ॥ प्रदक्षिचतस्रः ॥ या
निकानि च पापानि ब्रह्महत्यासमानि च ॥ तानि तानि विनश्यंति प्रदक्षिणं पदे पदे ॥ मयायन्मसह राम
स्त्रेषु आर्जितं पापसंचयं ॥ तत्सर्वं नाशये क्षिप्रं प्रदक्षिणं पदे पदे ॥ १ ॥ मूलमुच्चार्य श्रीविष्णोः ॥ २७ ॥

प्रदक्षिणां समर्पयामि ॥ यज्ञेन यज्ञमयं नमस्कारः ॥ तुभ्यं नमः पद्मसुनेत्रः पद्मनाभाय पद्मासन
पद्मपाले ॥ योगींद्र हृत्पद्मविकाशि हंस पद्मांकपद्मार्पितपाद पद्म ॥ ५ ॥ करयुगलकृतं वा पादप
द्मं कृतं वा ॥ श्रवणनयनजं वा मानसं वापराधं ॥ विहितमविहितं वा सर्वमेतत्क्षमस्व ॥ जय
जय करुणाब्धे श्रीपते मेकुकंद ॥ मूलम् ० श्रीविष्णोः नमस्कारं स ॥ श्रीविष्णोश्चरणारविंदं
गृहीत्वा मंत्रो यथा इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा
वाचा हस्ताभ्यां पद्भ्यां मुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां
मदीयं सकलं श्रीविष्णोः समर्पयेत् ॥ तिथ्यादिकं संकीर्त्य दक्षिणहस्ते अर्घादिकं गृहीत्वा संकल्पि
तपुरश्चरणसमाप्तिपर्यंतं अमुकसंख्याजप तथा होमं श्रीविष्णोः दक्षकरे निवेदयामि ॥ अर्घ
पात्रमुत्थाप्य साधु वासाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं भगवन्त्वं गृहाण परमेश्वर ॥ श्री

२८ विष्णोः प्रसन्नार्घ्यं समर्पयामि ॥ तत्पात्रं स्वस्थाने निधाय ॥ विष्णोरर्घ्योदकेन सर्वपात्राणि संस्कारोस्ति
॥ सर्वपात्रश्च्यावनं ॥ इति पात्रविसर्जनं ॥ उच्छिष्टभोजनं ददात् ॥ चंडेश्वराय नमः ॥ भक्ष्यभोज्यान्नपानादि
चंदनं स्रग्विलेपनं ॥ निर्माल्यभोजनं तुभ्यं दत्तमस्तु विष्वाज्ञया ॥१॥ इति निर्माल्यभोजनं ॥ एवं यावत्
प्रयोगसमाप्तिस्तावत्पर्यंतं प्रत्यहं पूजां कुर्यात् ॥ श्रीविष्णोश्चरणे आत्मानं समर्पयेत् ॥ संहारमुद्रया
श्रीविष्णोः स्वहृदि उद्वासित ॥ श्रीविष्णोः पूजितोसि क्षमस्व विसर्जयामि ॥ ततः स्वहृदि सुस्थानं श्रीवि
ष्णोः ध्यायन् क्षणं तन्मयः स्थित्वा पंचमानसोपचारैः श्रीविष्णोः हृदि संपूज्य विष्वक्सेननिर्माल्यं स्वशिर
सि धृत्वा यथासुखं विहरेत् सतु स्वशीर्षो० १५ इति स्तुतिपाठः ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञ
क्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ॥१॥ कायेन वाचा मनसेंद्रियैर्वा बुध्यात्म राम
ना वा प्रकृतिस्वभावात् करोमि यद्यत्सकलं परस्मै श्रीनारायणायेति समर्पयामि ॥२॥ प्रमादा ॥२८॥

तत्कुर्वतां कर्म प्रच्युवत्यध्वरेषु यत् ॥ स्मरणाद्देवतद्विष्णोः संपूर्णं स्यादिति श्रुतेः ॥ ३ ॥ एवं संपूज्य
विधिवत् वैश्वदेवादिकं चरेत् ॥ देवप्रसादं भुंजीत संभोज्य ब्राह्मणोत्तमान् ॥ ४ ॥ एवं यः पूजयेद्दे
वं त्रिकालं धर्ममाचरेत् ॥ न जातु वैरिभिर्दुःखैः पीड्यते हरिरक्षितः ॥ ५ ॥ त्रिकालपूजनेऽशक्तैः का
र्यो द्विः सकृदप्यदः ॥ विशेषेण यजेद्देवं संक्रांत्यादिषु पर्वसु ॥ ६ ॥ अथ पूर्वांचि० श्रीविष्णोः सावर्णा
नां षोडशोपचार कृतस्य विधेर्यन्न्यूनातिरिक्तं तत्सर्वं भवतां ब्राह्मणानां वचनात् श्रीविष्णोः प्रसा
दात्सर्वं विधेः परिपूर्णतामस्तु ॥ तेन पुण्येन श्रीगोपीजनवल्लभः प्रीयतां ॥ दशभिः पंचभिर्वापि पू
जयेदुपचारकैः ॥ आवाहनं १ आसनं २ स्नानं ३ आचमनं ॥ ४ ॥ वस्त्रं ५ चंदनं ॥ ६ ॥ पुष्पं ७ ॥ धू
पं ८ दीपं ९ नैवेद्यं १० पंचभिः पक्षे ॥ चंदनं १ पुष्पं २ धूपं ३ दीपं ४ नैवेद्यं ५ ॥ अशक्तः
कारयेत्पूजां दद्यादर्चनसाधनं ॥ दानाशक्तः समर्चेत पश्येत्तत्परमानसः ॥ १ ॥ स्वयं संपाद्यस

२९ वालिश्रद्धयासाधनानियः ॥ पूजयेत्तत्परोदेवंसलभेत्ताःखिलंफलं २ ॥ पूजनेनफलार्हःसादन्यद
द्वैस्तुसाधनैः ॥ तस्मात्स्वयंसमानीयसाधनान्यर्चनंचरेत् ॥ ३ ॥ देवपूजाविहीनोयःसनरोनरकेपचे
त् ॥ यथाकथंचिद्देवार्चाविधेयाश्रद्धयाततः ॥ ४ ॥ अथविष्णुआचमन ॥ ततआचम्यपीगस्यस्तिलकं
रचयेत्सुधीः ॥ केशवाद्यभिधानैस्तुस्थानेषुद्वादशेष्वपि ॥ १ ॥ ललाटोदरहृत्कंठदक्षपार्श्वांसकंठ
तः ॥ वामपार्श्वांसकंठेचपृष्ठदेशेककुद्यपि ॥ २ ॥ ॐकेशवायनमोललाटे ॥ ॐनारायणायनमःउदरे ॥ २ ॥
ॐमाधवायनमःहृदये ३ ॥ ॐगोविंदायनमःकंठकूपके ॥ ४ ॥ ॐविष्णवेनमःदक्षपार्श्वे ॥ ५ ॥ मधुसू
दनायनमःदक्षांसे ॥ ६ ॥ ॐत्रिविक्रमायनमःकर्णमूले ॥ ७ ॥ ॐवामनायनमःवामपार्श्वे ॥ ८ ॥ ॐश्रीध
रायनमःवामबाहौ ॥ ९ ॥ ॐहृषीकेशायनमःवामकर्णे ॥ १० ॥ ॐपद्मनाभायनमःपृष्ठे ॥ ११ ॥ ॐ राम
दामोदरायनमःककुदि ॥ १२ ॥ ॐवासुदेवायनमोमूर्ध्नि ॥ १३ ॥ ललाटेतुगदांकुर्यात्तहृदयेनंद २९

. शंखचक्रभुज दंडि शार्ङ्गबाणं च मूर्द्धनि ॥ २ इति तिलकं ॥ अथ वैष्णवाचमनविधिः ॥
. केशवाय नमः ॥ नारायणाय नमः ॥ ॐ माधवाय नमः ॥ इति त्रिर्जलं पीत्वा ॥ ॐ गोविंदाय नमः ॥ ॐ
विष्णवे नमः ॥ इति द्वाभ्यां करौ प्रक्षाल्य ॥ ॐ मधुसूदनाय नमः ॥ ॐ त्रिविक्रमाय नमः ॥ इति द्विरोष्ठौ प्र
क्षाल्य ॥ ॐ वामनाय नमः ॥ ॐ श्रीधराय नमः ॥ इति मुखे ॥ ॐ हृषीकेशाय नमः ॥ इति दक्षहस्तं प्रक्षाल्य
॥ ॐ पद्मनाभाय नमः ॥ इति पादौ ॥ ॐ दामोदराय नमः ॥ इति शिरस्यभ्युक्ष्य ॥ ॐ संकर्षणाय नमः ॥ इ
ति मुखं ॥ ॐ वासुदेवाय नमः ॥ ॐ प्रद्युम्नाय नमः ॥ इति नासिके चांगुष्ठप्रदेशिनीभ्यां स्पृष्ट्वा ॥ ॐ अ
निरुद्धाय नमः ॥ पुरुषोत्तमाय नमः ॥ इति अक्षिणी ॥ ॐ अधोक्षजाय नमः ॥ नृसिंहाय नमः ॥
इति कर्णौ चांगुष्ठानामिका हृदयं ॐ उपेंद्राय नमः ॥ इति शिरः ॐ भ्यां स्तनौ ॥ ॐ अच्युताय नमः
॥ इति अंगुष्ठकनिष्ठिकाभ्यां नाभिं ॥ ॐ जनार्दनाय नमः ॥ इति करतलेन हृदये ॥ ॐ उपेंद्राय नमः

॥३०॥ इति शिरः ॥ ॐ हरये नमः ॥ ॐ कृष्णाय नमः ॥ इत्यं सौ च सर्वाभिः स्तोत्रैर्दितिवैष्णवाचमनम् ॥ श्रीकृष्णा
य नमः ॥ श्रीगोपिजनवल्लभाय नमः ॥ इति श्रीनारदपंचरात्रे विष्णुरहस्यागमसारे विष्णुयज्ञस्य ।
...श्रीमहाविष्णुयोगे ...आप इति समाप्तः ॥ ॥ नवानगरमध्ये लिखितं व्यास लीलाधर वि. भीमजी
ये आ पुस्तक लखुं छे गे काणु बक्षीजे त्रांकर जगजीवन ना६ घर पाशे छे ॥ संवत १९४२ ना शाके
१८०७ ना कार्त्तिक शुदी १० मंगलवासरे ॥ श्रीशुभं भवतु ॥ श्रीकल्याणं ॥ श्लोक निसं. ६५१ छे.

राम
॥३०॥